प्रक्रमयति आपश्रौ १, १५, १; ५,१९,१××; भाश्रौ; शांगृ १, १४, ५[a]; आपगृ ४, १६[b]; भागृ १,१७ : १[a]; मागृ १,११,१८[a]; वागृ १४, २३[a]; प्रक्रामयति पागृ १, ८, १[a]; कागृ २५, ४२[a];
प्रक्रमयेत् बौश्रौ २४, ७ : २; कौगृ १,८,२८[a].
प्राचिक्रमिषीत् निसू ७,३ : ७; ८,१२ : ९; १०,६ : १०?[c].
प्र-क्रम[d]- -मः काश्रौ १६, ८,१६; बौश्रौ; काशु ६, २; ९; आपशु ६,२; बौशु १ : ६;४ : १८;२१; हिशु २, २७; -मम् भाश्रौ ७, ३,२;१२,५,४; निसू ८,६:३०; काशु ६,३;७,३४; -मस्य काश्रौसं २५ : ३; बौश्रौ २६, १० : ३; आपशु ५,११; ६, १; हिशु २, २०; २६; अपं १ : १५; -माः आपशु ५,१; बौशु ४ : ३; २० : ४; हिशु २, ७; -माणाम् बौश्रौ २६,२५ : २०; -मात् आपश्रौ ३,१५,३; बौश्रौ; -मान् काश्रौ ८, ५,२६; २०, ३,३; आपश्रौ; काशु ६, २; बौशु ४ : ५; -माभ्याम् बौशु २० : ५; -मे आपश्रौ ३,१५,३; १७,९; ११, ९, ९; भाश्रौ; आपशु ६, २; बौशु १ : ७; हिशु २,२८; ४३; -मेण बौश्रौ २३, १९ : ७; ९; काशु ६, ४; बौशु २० : १५; मीसू २, ४, ३; -मेणऽ-मेण बौशु १० : ९; २० : ९; -मेषु काश्रौ ४,८,१७;७,२,३; ८, ३, ७;४, ५; आपश्रौ; काशु ६, ३; आपशु ४,३; बौशु ३:२†; हिशु २,२; -मैः बौशु १० : ११.
प्रक्रम-तृतीय[e]- -येन काश्रौ १९,२,२.
प्रक्रम-प्रमाण[f]- -णानि बौशु १० : १५; २० : ६.
प्रक्रम-मात्र- -त्रे माश्रौ १, २, ४,८;७,३,१५;२, २, ३, १३; वाश्रौ १,६,१,१९.
प्रक्रम-वेला[g]- -लायाम् बौश्रौ १०, ३० : ८,३१ : १३; ३३ : ९××.
प्रक्रम-व्या(स>)सा[h]- -साः बौशु १८ : ६; २१ : ६.
प्रक्रम- सप्तम-भाग- -गान् काशु ६,२.
प्रक्रम-स्थान-> °नी(य>) या[i]- -या आपश्रौ १४, ५,११; काश्रौसं २५ : २; हिश्रौ ९,८,६; आपशु ५, ११; ६, १; हिशु २, २०;२६.
१प्रक्रमा(म-अ)र्थ[j]- -र्थः बौश्रौ १९,१ : ७; काशु ६,३;४.
२प्रक्रमा(म-अर्थ>)र्था[k]- -र्था काशु २,१९.
प्रक्रमो(म-उ)त्थान[l]- -ने काश्रौ ७,१,२६.
प्र-क्रमण- -णम् काश्रौ १६, ७,३०; वागृ १४, २७; -णात् माश्रौ ५, २,१२,२०;-णे बौश्रौ २०,६:१.
प्र-क्रममाण- -णम् मागृ २, ४, ३.
प्र-क्रमय्य वाश्रौ २,१,६,१०.
प्र-क्रम्य आपश्रौ १, १५, ४, ३, १०,५××; बौश्रौ; या १४, ७.
प्र-क्रान्त- न्तम् बौश्रौ २०, ४ : २; ५; वाधूश्रौ ३, ३७ : ४; -न्तान् कौगृ ५, ३, २८[m]; -न्ते वैश्रौ १३,३ : ६.
?प्र-क्रान्ति- -न्तौ काश्रौसं ३१ : १२[n].
प्र√क्रीड्, प्रक्रीडन्तु वागृ १३, ४†.
प्रक्रीडयति कागृ १७, ३;
प्रक्रीडयन्तु कागृ १७, २†.
प्र√क्रुश् >†प्र-क्रोश- -शाः द्राश्रौ ११,२,१०; लाश्रौ ४,२,९?[o].
†प्रक्ष[p]- -क्षः भाशि ९१; -क्षस्य[q] जैश्रौका ६५; साअ १, ६१०; उनिसू ६:१५;-क्षे[r] शांश्रौ १८, १५,५; गौपि २, ४,७; साअ १, ४४४; उनिसू ५ : २०.

a) सपा. प्रक्रमयति <> प्रकामयति <> प्रक्रमयेत् इति पाभे.। b) पाभे. पृ ९३९ m द्र.। c) °क्रमयि° इति पाठः? यनि. शोधः (तु. पूर्वे स्थले)। d) =प्रमाण-विशेष- (त्रिपद-), भाप.। वैप १ द्र.। e) षस.। पूप. =(उपचारतः) प्रक्रममापिका-रज्जु- (तु. विद्याधरः)। f) विप.। बस.। g) =प्रक्रमप्रमाण-देश-। h) विप. (इष्टका-)। बस.। i) =(चतुर्विंशभागसंमिता-) रज्जु-। इह प्रक्रमपदमप्यस्मिन्नेवार्थे रूढमिति गोपीनाथः (तु. हिश्रौ.)। j) कस.। k) चस.। l) द्वस. (प्रारम्भ-समाप्ति-)। m) पाभे. पृ १६४९ l द्र.। n) पाठः? पूर्वेण समस्तं द्र.। o) प्र-कोशाः इति पाठः? यनि. शोधः (तु. द्राश्रौ.)। p) वैप १, २११६ c द्र.। q) =पृक्ष- (अन्न-)। पाभे. वैप १,२०८८ e द्र.। r) वैप १,२११६ f द्र.।

†प्र√क्षर, प्र(अक्षरत्) आश्रौ ८,९,७; शांश्रौ; प्र(अक्षरन्) शांश्रौ ७, १५,१४[2]; क्षुसू १,३:८; ऋअ. प्र(अक्षाः) साश्र २,५१०.

प्र-क्षर(त् >)न्ती- -न्तीषु शांश्रौ ७,१५,१४.

प्र√क्षल्, प्रक्षालयते बौश्रौ २, २०: ३; २८, ८: ४; माश्रौ; प्रक्षालयति काश्रौ ७,५,१६; आपश्रौ; प्रक्षालयतः माश्रौ २,५,४, ३५; ५,२, ११, ३७; हिश्रौ १०, ५, २७; प्रक्षालयन्ते हिश्रौ ७, ३, ७८; ४, २३; प्रक्षालयस्व भागृ २,२८:५; †प्रक्षालय कौसू ८७, ६; १२; प्रक्षालयत बौश्रौ ६, १०: २१; प्रक्षालयीत आपश्रौ ९,३,१४; भाश्रौ ९,५,३; हिश्रौ; प्रक्षालयेत् बौश्रौ ९, १७: २०; १८:२०; २०,२६: ३८; गोगृ; प्रक्षालयेरन् माश्रौ २,२,१,१०; प्रक्षालयेयुः लाश्रौ ८,८,११.

प्रक्षालापयीत[a] आगृ १,२४,१०.

प्र-क्षालन- -नम् काश्रौ २२, ६, ११; आपश्रौ १२, २७, १०; वाश्रौ १, ५, २, ५०; वैश्रौ; -ने बौश्रौ २०, २६: ३८; -नेन काश्रौ १९, ९, २१[b]; विध २३, १७.

प्र-क्षालयत्- -यन्तम् कौसू ६४,९.

प्र-क्षालयमान- -नः माश्रौ १, ६, २, १.

प्र-क्षालयितृ- -तारम् आपगृ १३,६.

प्र-क्षालित,ता- -तः बौश्रौ ४, ४: ११; -तम् काठश्रौ ५२; बौश्रौ; -ता बौश्रौ ६,२६: २९; -ताः बौश्रौ १७, १२: २; -तानि बौश्रौ १,८: १; २, १८: २७; ३,४: १५; -ताम् वैश्रौ १४, १०: ८; -तायाम् आपश्रौ १, २४,१; -ते काश्रौ ८, ३, १९; ५,२२; बौश्रौ; -तेषु काश्रौ २०, ६,१४; -तौ कौसू ९०,११.

प्रक्षालित-पाणि[c]- -णिः मागृ १,१८,४; २,१६,६.

प्रक्षालित-पाणिपाद, दा[c]- -दः आग्निगृ २, ४,६: २३; वैध ३, ७,६; -दा भागृ ३, १२: ९; -दौ बौगृ १,८,१२.

प्रक्षालित-पाद[c]- -दः आगृ १, २४,११; -दाः काठश्रौ १३३.

प्रक्षालित-पाद-पाणि[d]- -णिः बौश्रौ २९,५:२४; बौध २,४,२.

प्रक्षालित-शिरस्[c]- -रसम् वाश्रौ २,२,४,१६.

प्रक्षालिता(त-अ)भ्यक्त-पाणि-पाद[e]- -दानाम् कौसू ५२,१२.

प्रक्षालितो(त-उ)पवात[f]- -तानि आग्निगृ २,६,२: २४; कौसू २, २९; बौध १,६,५; २,५,१२[g].

प्र-क्षाल्य आश्रौ १, १३, १××; शांश्रौ; आपश्रौ १५, २१, ७[h].

प्र-क्षाल्यमान- -नम् वैताश्रौ १०, ३; -नौ कौसू ७६,२७[2]†.

प्र-क्षाम-, °क्षायत्- प्र√क्षै द्र.

प्रक्षाव[i]- -वेभ्यः जैश्रौ २६: १५[2].

प्र√क्षि[j], प्रक्षिणोति हिश्रौ १२, ३, १२†; †प्रक्षिणोमि आपश्रौ १७, १२, ६; हिश्रौ १२, ३, १२; प्रक्षिणुयात् आपश्रौ १७,१२,६; हिपि ३: ४.

प्रक्षिणाति कौसू ४८, १०; या ६,५.

प्रक्षीयते अप ५३,१,५.

प्र√क्षिप्, प्रक्षिपति वैश्रौ १२,६: २; वैगृ ७, ६: १०; गौपि १, २, ३४; कौसू ३१, १२; वैध २, ७, २; ३; प्रक्षिपेत् जैश्रौका २०५; आग्निगृ.

प्र-क्षिपत्- -पन् विध ५,११०.

प्र-क्षिप्त- -प्तम् विध २३, २; -प्ताः माश्रौ १,२,६,६.

प्र-क्षिप्य बौश्रौ २७, ७: ३; माश्रौ; वैश्रौ ६,१: ६[k].

प्र-क्षिप्यमाण- -णः ऋअ २,७,३२; अअ २०,७९?[l].

प्र-क्षेप- -पः विध १९, ११; -पम् अप ७०,४,१०.

प्र-क्षेपण- -णम् भागृ ३,१८: १७; बौध ३,२,८.

प्रक्षेपणी[m]- > °ण्या(णी-आ)दि- -दीनि वैगृ ५,४: ३७.

प्रक्षेपणीय[n]- -यानि वैश्रौ ११, १०: १.

प्र√क्ष्णु, प्रक्ष्णौति बौपि १,३: १४; २१; २८.

प्र-क्ष्णुत- -तः या २, २५; -तान् माश्रौ ५,१,८,५.

प्रक्ष्णुता(त-अ)ग्र[c]- -ग्रः आपश्रौ २२,४,७; हिश्रौ १७, २,९.

---

a) णयन्ताद् आपुगागमः उसं. (पावा ३,१,२५)। b) =उदक-। c) विप.। बस.। d) विप.। बस.>द्वस.। e) विप.। कस.>बस.। f) विप.। कस. उप. =शुष्क-। g) तु. चौसं.। °वाताक्लि° इति मैसं.। h) प्रा° इति पाठः? यनि. शोधः। i) अर्थः व्यु. च?। j) वैप १,११९० a द्र.। k) पाभे. पृ ३२६ m द्र.। l) °णम् इति पाठः? यनि. शोधः (तु. ऋअ.)। m) =पात्र-विशेष-। n) अर्हार्थीयश् छः प्र. उसं. (पा ५,१,६९)।

प्र √क्षै > प्र-क्षाम- -मः आपश्रौ ९, १५. २०; भाश्रौ ९, १८, ९; हिश्रौ १५,४,४०.

†प्र-क्षायत्- -यतः[a] आपश्रौ ४, ११,५; १६, १; भाश्रौ ४, १७, २; हिश्रौ ६,३,८; ४,१८.

प्र √खिद् > प्र-क्खिदत्- -दते तैप्रा १४,८†.

†?प्रखुदसि[b] शांश्रौ १२,२३,४.

प्र √ख्या > प्र-ख्या- > °ख्या (ख्या-अ)भाव- -वात् मीसू १,१,२२.

प्रख्या(ख्या-अ)विशेष- -षात् पावा १,२,६४.

प्र-ख्यात- -तम् या ३,१९; ५,८.

प्रख्यात-तम- -मेन या ३,१३.

प्र-ख्यापन- > °नीय- -यम् या ५,८.

प्र-ख्याय अप्राय २,४.

?प्रख्यायत्- -यतः शांश्रौ ४, १२, १०†[c].

?प्रग अप ४८,१५.

प्रगदिन्- (>प्रागद्य- पा.) पाग ४,२,८०.

प्र √गम्, प्रो (प्र-उ)···अग्मन् आश्रौ ६, ४, १०†; प्रो (प्र-उ[अग्मन्]) शांश्रौ ९,१७,३†.

प्र-जिगांसत्- -सन् शांश्रौ १६,२२, १०.

प्र √गल्भ् > प्र-गल्भ[d]- -ल्भः बौश्रौ १७, ५० : १६; शैशि १६३; याशि १,२९.

प्र √गा, प्र···जिगाति बृदे ६,३०†; †प्र(जिगाति) आश्रौ १, २, ७; ४,१३,७; ७, ८,१; शांश्रौ.

†प्रागात् आश्रौ १०, ८, ७; आपश्रौ; या ६, २२[e]; †प्र··· अगात् आपश्रौ १, ३, ५; ५,१; बौश्रौ; प्र(गुः) कौसू ३४, २०†; †प्रागाः आश्रौ ४, १०, ५; शांश्रौ ५, १४, १८; प्र··· गाः बौश्रौ १०, ४ : ११†; †प्रगाम आश्रौ २, ५,४?[f];१९, ३६?[g]; ६,६,१८; आपश्रौ.

प्र-गाथ- प्रमृ. प्र √गै द्र.

प्र √गाह् > प्र-गाहण- -णम् आश्रौ १२,८,८.

प्र-गाह्य आपश्रौ ८,७,२७××;हिश्रौ

प्र-गीत- प्र √गै द्र.

?प्रगुण[h]- -णौ क्षुसू २,६ : ११;२६.

प्र √गृ (अवबोधने) > प्र-जागर- -रः शंध १५६.

प्र √गृभ्,ह्, प्र···गृभायत शांश्रौ १२, १९,३†.

प्रगृह्णाति काश्रौ ३,६,१७××; प्रगृह्णन्ति बृदे २, १४२; प्रगृह्णीयात् काशु ७,१८.

प्र-गृही(त>)ता- -तायाम् वाधूश्रौ ४,५ : १३?.

प्रगृहीत-प(द>)दा[i]- -दाः ऋप्रा २,५४.

प्र-गृह्णत्- -ह्णन्तः बौश्रौ १८,२१:६.

प्र-गृह्य शांश्रौ १,६,१०××; बौश्रौ; या २,२६.

प्र-गृह्य[j]- -ह्यः ऋप्रा १, ६८; शौच १,७३; -ह्यम् ऋप्रा ११, ३९; शुप्रा १, ९२; ४, १८; ८८; ७, ७; पा १, १, ११; -ह्यस्य ऋप्रा १०, २०; -ह्याः ऋप्रा १, ७३; २, ५१; शौच ३, ३३; पावा १, १,११; -ह्याणाम् अप्रा ३, १,२; -ह्ये शुप्रा ४,१९४; -ह्यौ शांश्रौ १, २,७.

प्रगृह्य-प्लुत-प्रतिषेध—प्रसङ्ग- -ङ्गः पावा ६,१,१२७.

प्रगृह्य-मध्य- -ध्ये अप्रा २, ३, १०.

प्रगृह्य-संज्ञा- -ज्ञायाम् पावा १, १,१२; ६,१,८४; ८, २,६.

प्रगृह्या(ह्य-अ)वगृह्य-चर्चा- -र्चायाम् शौच ४,१२३.

प्रगृह्या(ह्य-अ) वगृह्य-समापाद्या-(द्य-अ)न्तगत- -तानाम् शौच ४,११७.

प्र-ग्रह(बप्रा.)[k]- पा ३, ३, ५२[l]; ५३[m]; -?ह[n] कौशि ६८; -हः कप्र १, ८,१२[o]; -हस्य कौशि ४८[p]; -हाः तैप्रा ४,१[p]; -हेभ्यः हिश्रौ २१,२,३३[p]; -हैः आपश्रौ १४,२६,१†[q].

प्रग्रह-ह्लादि- -दिषु तैप्रा १,६०.

प्र-ग्रहण- > °ण-मन्त्र- -न्त्रेण शांश्रौ ७,५,१.

प्र-ग्राह- पा ३,३,४६; ५२;५३.

प्र √गॄ (निगरणे), प्रगिरन्ति आश्रौ ६, १३, १०; प्रागिरत्, प्रागिरताम् वाधूश्रौ ४, १९ : २९.

---

a) पाभे. वैप २, ३ खं. प्रक्षायतः तैब्रा २, ४, १, २ टि. द्र. । b) पाठः? शोधार्थं वैप १, १२०३ a,o द्र. । c) पाठः? प्रक्षायतः इति शोधः (तु. सपा. तैब्रा २, ४, १, २; C. च) । d) वैप १ द्र. । e) पृ ६८३ f द्र. । f) प्रणम इति पाठः? यनि. शोधः (तु. आन., BC. च)। g) प्रमाम इति पाठः? यनि. शोधः (तु. आन.)। h) अर्थः व्यु. च?। i) =संहिता-विशेष- । बस. । j) =पारिभाषिक-संज्ञा- । k) कर्मादिषु अप् प्र. । l) =तुला-सूत्र- । m) =अश्व-रश्मि- । n) त्रुटितः पाठः । o) =(स्रुक्-स्रुवयोः) दण्ड- (तु. संस्कर्तुः टि. [गोगृ १,३,९]) । p) =प्र-गृह्य- । q) अर्थः?।

प्रगिरेत् द्राग् ३,३,१३.

प्रगे[a] लाश्रौ ८,३,२; गोगृ २,१०,६.

प्रगे-तन- पा, पावा ४,३,२३.

प्र√गै, †प्रगायामसि वाधूश्रौ ४, ४७ : ८; आपमं १, ३, ५; पागृ १, ७, २?[b]; आग्निगृ १, ५, ३ : १६; बौगृ १, ४, ९; भागृ १, १६ : ५; मागृ १, १०, १५?[c]; हिगृ १, २०, १?[d]; †प्रगायत आश्रौ २,१५,२; ७, ८,२; शांश्रौ; या ७, २; प्र··· गायत आश्रौ ७, ८, १; शांश्रौ १२,१०, ७; †प्र(गायत) आश्रौ ६, ४, १०; ७, ५, ९; ८,४,१; शांश्रौ; प्रगायेत् माशि ६, ६; नाशि १,६,१५.

प्र-गाथ[e]- -थः आश्रौ ५, १४, ५; १८; शांश्रौ ७, १४, ७××; लाश्रौ; ऋअ ८, १[f]; १०[f]; ४८[f]; ६२[f]; बृदे ६, ३५[f]; ३८[f]; ५०[f]; शुअ ३, २१०[f]; अअ २०, ९[g]; १०[g]; १४[g]; ९३[f]; -थम् शांश्रौ ६,९,७; ७,१९,१०××; ऋअ; -थाः आश्रौ ५,१०, १९; १४, ७××; लाश्रौ; ऋअ १, ११, १[g]; -थान् आश्रौ ७, ३, ४; १२, ८; ८, ४, १६; शांश्रौ; -थानाम् आश्रौ ५, १५, २०; निसू ५, ५ : २; -थाय शांश्रौ ७, २१, ८; वैताश्रौ २०,१६; -थे आश्रौ ५, १५, ६; ८,६, १८; मीसू ९,२,२७; साअ १, ४०; -थेन शांश्रौ १०, १३, १५; ११,१२,८; बृदे ३,१११; -थेभ्यः आश्रौ ५,१०,१३; ९, ५, ६××; -थेषु आश्रौ ६,५, २१; शांश्रौ १२, ९, ८; लाश्रौ; पा ४, २, ५५; -थौ आश्रौ ५, १५,२; १६, २[h]; २०, ६××; शांश्रौ.

प्रागाथ[i]- -थः[j] ऋअ २, ८, ६०; ६६; ७२××; -थम्[k] ऋअ २,१,३६; ३९××; ऋप्रा १,८७.

प्रागाथी[l]- -थीम् आश्रौ ४,७,४.

१प्रागाथि (क>) का[m]- -काम् शांश्रौ ५,१०,२६.

२प्रागाथिक[n]- -कम् क्षुसू ३, ३ : ११; ४ : १०; ५ : ५; मीसू ९, २, २५; -कानि लाश्रौ ६, २, १६[o]; निसू ५,५ : १९?[p]; १०,६ : ८.

प्रगाथ-कारम् द्राश्रौ २, ४, १५; लाश्रौ १,८,११.

प्रगाथ-तृच-सूक्ता(क्त-आ)गम[q]- -मेषु आश्रौ ७,१,२२.

प्रगाथ-बृहती- -तीषु निसू ६, ११ : २४.

प्रगाथ-शब्द- -ब्दात् उनिसू ५ : ३७.

प्रगाथ-स्थ- -स्थे शांश्रौ ७,२५, ९.

१प्रगाथा(थ-अ)न्त- -न्तेषु आश्रौ ८,२,२०.

२प्रगाथा(थ-अ)न्त[r]- -न्तम् ऋअ २, ८,१७; ७७.

?प्रगाथा(थ-अ)प्रभव- -वात् लाश्रौ १०,६,८.

प्रगाथा(थ-अ)यन- -नानि निसू ५,३ : ७.

प्रगाथी √कृ > प्रगाथी-कार- -राय निसू ७, २ : १३.

प्र-गीत- -ते नाशि १,५,१६.

प्र √ग्मन् > φप्र-ग्मन्तृ- -†ग्मन्ता आपमं १,१,१; बौगृ १,१,१४; वैगृ ३,२:४; ऋअ २,१०, ३२.

प्र √ग्रथ्, न्थ्, प्रग्रथ्नाति बौश्रौ ६, १७ : १७; १०, ११ : १८××; वैश्रौ १९, ६ : ५४; प्रग्रथ्नन्ति बौश्रौ ६,१:१८; १०,१७:७××.

प्र-ग्रथन- -नम् वैताश्रौ २२, ९; २५,५.

प्र-ग्रथित,ता- -तः बौश्रौ ८, ५ : २; -ता बौश्रौ ११, ६ : १२; १२,७ : २६.

प्र-ग्रथ्य बौश्रौ ६,१२ : ६××; वैश्रौ.

---

a) =प्रातर्। सप्त१<प्रग-। अव्य.। व्यु.? <प्र√गम् इति PW. प्रभृ., <प्र√गै इति अभा.। *b*) प्रजायामस्य इति पाठः? यनि. शोधः (तु. [अंशतः] लाधा. Old. च)। *c*) प्रगायामि, अस्य इति पाठः? यनि. शोधः [तु. b,d टि. च]। *d*) प्रजायामसि इति पाठः? यनि. शोधः (तु. सपा. पूर्वाणि स्थलानि, Old. च)। *e*) =द्व्यृच- (तु. आश्रौ ५, १४, ७ ऋप्रा १८, १) वा (छन्दोऽन्तरेण प्रग्रथनात्) तृच- (तु. सा [ऐब्रा ३, १७], पाका [४, २, ५५] च) वा। शेषं वैप १ द्र.। *f*) =ऋषि-विशेष-। *g*) =छन्दो-भेद-। *h*) एकतरत्र तु. आन.। *i*) अपत्यार्थे तस्येदमित्यर्थे च अण् प्र.। *j*) =प्रगाथापत्य-। *k*) =सूक्त-। *l*) ऋच्-। प्रगाथनिर्दिष्टा- इति संस्कर्तुः टि.। प्रगाथसंबन्धिनी इति C. [शांश्रौ ५,१०,२६]। *m*) =प्रागाथी-। स्वार्थे के ह्रस्वः। *n*) विप.। तस्येदमीयष् ठक् प्र.। *o*) =सामन्-। *p*) प्रगा° इति पाठः? यनि. शोधः। *q*) द्वस. > षस.। *r*) विप.। बस.।

प्र√ग्रन्थ् प्र√ग्रथ् द्र.
प्र-ग्रह- प्रभृ. प्र√गृभ्, ह् द्र.
प्रग्रीव- पाग २,४,३१.
प्र-घण- प्र√हन् द्र.
प्र√घस्>प्र-घास[a]- >°सिन्[a]-
-†सिनः[b] काश्रौ ५,५,९; शुअ १,२१२; -†सी आपश्रौ १७, १६,१८; वैश्रौ १९, ६ : १०८; हिश्रौ १२,५,३०.
†प्रघास्य[a]- -स्यान्[b] आपश्रौ ८, ६, १९; काठश्रौ ३४ः[c]; बौश्रौ ५, ७ : १२; भाश्रौ ८, ८,६; माश्रौ १, ७, ४, १२; वाश्रौ १, ७, २, ३०; वैश्रौ ८, ११ : १०; हिश्रौ ५,२,४७.
प्र-घाण-, °घात-, प्रघान् प्र√हन् द्र.
प्र√घृष्>प्र-घृष्य कौसू २६,२२.
प्र√चक्ष्, प्रचक्षते कप्र २, ५, ११; ८,२१××; अप.
प्रचक्ष्यते अप ६३,१,६.
प्र-चक्षण- पाग ८,१,२७.
प्र-चण्ड- -ण्डः चव्यू ४ : १९.
प्रचण्ड-तर- -रः चव्यू ३ : १२.
प्र-चय- प्रभृ. प्र√चि (चयने) द्र.
प्र√चर्, प्रचरति काश्रौ १४,५, १९; १५,६,३५; आपश्रौ; वैश्रौ १६, २० : ९[d]; †प्र···चरति[e] आश्रौ ४, ७, ४; शांश्रौ ५, १०, १८; प्रचरतः आपश्रौ ८, ७, ९; १२, २१, ७××; भाश्रौ; प्रचरन्ति आश्रौ १०, ९, ६; शांश्रौ १४, ४०, १२; काश्रौ; †प्र (चरन्ति) काश्रौ १५, ६, ८[f]; शुअ १,६१३; †प्रचरन्तु आपश्रौ १६,२५,२; बौश्रौ १०, ३३ : ५; वैश्रौ १८, १७ : ५१; २०, ३५ : ७; बौगृ १, ३, ३४; †प्रचर, >रा शांश्रौ १२, २३, ४; काश्रौ ६, ६, १८; बौश्रौ; †प्रचरत, >ता आपश्रौ १५, ६, २[g];३; बौश्रौ ३, २६ : ९; ९,६ : ६[g]; १४,९ : २६; भाश्रौ ११, ६, २[g]; ३; वैश्रौ १३, ८ : १[g]; हिश्रौ २४,२,८[g]; वैताश्रौ; कागृ[h] २६,१२;४५,१२; प्रचरेत् आपश्रौ ९, १, २८; ३०××; काश्रौसं ३०,७;३२:९[i];११[i]××; बौश्रौ; प्रचरेयुः आश्रौ ३, १०, २५; शांश्रौ.
†प्रचरिष्यामः काश्रौ २६, २, २५; आपश्रौ १५,६,१; बौश्रौ.
प्र-चरण[j]- -णः[k] वाधूश्रौ ३,१०० : ८; -णम् काश्रौ ९, १३, ८; भाश्रौ ८, १९, १; माश्रौ १,३, २,२०; वैश्रौ १७,५ : ६; -णात् काश्रौ २,६,३१; माश्रौ; -णाय कप्र २, १, २[1]; -णे अप ६५, २,५.
प्रचरणी[a]- -णी वाधूश्रौ ३, १०० : ७; -णीम् काश्रौ ९, २, १९; आपश्रौ; -ण्या काश्रौ ८,७,१; ९,३,१; १०, ६, १४; आपश्रौ; -ण्याम् काश्रौ २५, १०,१०; १४; आपश्रौ.
प्रचरणी-दण्ड- -ण्डे वैश्रौ १४,१४ : १२.
प्रचरणी-शेष- -षात् आपश्रौ १२,६,५; -षेण काश्रौ १०,६,१७.
प्रचरणी-संस्रव- -वम् काश्रौ ९,३,१३.
प्रचरण-कल्प- -ल्पः आपश्रौ १४,४,१५; बौश्रौ २८, ४ : ७; ६ : १७; हिश्रौ ४,५,६५[2]××.
प्रचरण-काल- -ले आपश्रौ ६, २९,२२; ८,२,१७××; वाश्रौ.
प्रचरण-योग- -गात् काश्रौ १६, १,१५.
प्रचरण-वेला- -लायाम् माश्रौ १,६,४,१८.
प्रचरणा(ण-आ)दि- -दि आपश्रौ १८,२०,१.
प्रचरणीय- -यम् आपश्रौ १५, ७, २; १४, ७; बौश्रौ ९, ५ : २१××; -ये भाश्रौ ११, १४, ९; वैश्रौ १३,१६ : १९; हिश्रौ २४,६,८.
प्रचरणीयो(य-उ)पाव-हरण- -णात् वैश्रौ १३,१७ : २.
प्र-चरत्- -रन्तः बौश्रौ २६, १२ : २१; -†रन्तौ आपश्रौ १४, २८,४; हिश्रौ १५,७,१२.
प्र-चरित- -तम् आपश्रौ २१, ७, १७; १७,५; हिश्रौ १६, ३,३६; -ते आपश्रौ १४, २, ६; वैश्रौ.
प्र-चरितुम् वैश्रौ १५,२५ : ११.
प्र-चरितोस्(:) वैताश्रौ १६,५.
प्र-चरिष्यत्- -ष्यन् बौश्रौ ११,२ : ८; २५, १६ : ९; ३३ : ११;

a) वैप १ द्र.। *b*) पाभे. वैप १, २११८ h द्र.। *c*) °घा° इति पाठः? यनि. शोधः (तु. तै १,८,३,१; आपश्रौ. च)। *d*) सप्र. आपश्रौ १३,१६,१२ प्रतिपद्यते इति पाभे.। *e*) पाभे. वैप १,२११८ o द्र.। *f*) पाभे. वैप १,१३११ n द्र.। *g*) पाभे. वैप १,२११९ b द्र.। *h*) पाभे. वैप १,२१६३ i द्र.। *i*) यक्र. प्रवरेत्, प्रवरे इति पाठौ? यनि. शोधः (तु. आपश्रौ ९,१,२८;३०)। *j*) उप. भावकरणयोर् ल्युट् प्र.। *k*) =स्रुव-। *l*) प्रचरणीयाः इति जीसं.।

वाधूश्रौ ३, १०० : १; ४,४४ : ४; -ष्यन्तः आपश्रौ १५,५,१; बौश्रौ १४,९ : २३; भाश्रौ ११, ५,१; हिश्रौ २४,२,१.
प्र-चर्य काश्रौ ८,३,६××; आपश्रौ.
प्र-चर्या- -र्या आश्रौ ३, १०, २८; -र्याः हिश्रौ २२, ३, २०.
प्र-चार- पाग ५,२,३६; -रः वैश्रौ १७, ८ : १२; विध १८, ४४.
प्रचार-रथ्या- -थ्यानाम् शंध २७८.
प्रचारित- पा ५,२,३६.
प्र-चार्य काश्रौसं २९ : १५.
?प्रचरतिम् वाश्रौ १,७,२,१५.
प्र-चरित- प्रमृ. प्र √चर् द्र.
प्र √चल्, प्रचलति अप ३७, ३, १; प्रचलेत् मागृ २,१५,६.
प्र-चल- -लः अप ७१,५,५.
प्र-चलित- -तैः विध १,३५.
प्र √चि (चयने), प्रचिन्वीत गोगृ ३,५, १४; जैगृ १,१९ : २४.
प्र-चय[a]- -यः ऋप्रा ३, १९; तैप्रा १८,३;२१, १०; शैशि; -यम् उसू ८,१३; माशि ५, ७; याशि १,५५; भाशि २; -यान् याशि १,५९; -ये पावा २,१,१.
प्रचय-पूर्व- -र्वः तैप्रा १९, २.
प्रचयपूर्व-क- -कः कौशि२७.
प्रचय-स्थ- -स्थम् माशि ५, ३; नाशि २,३,१; -स्थानि नाशि २,७,८.
प्रचय-स्वर- -रः ऋप्रा ३, २२; -रम् उसू ८,११;१८; -रे ऋप्रा ३, २७.
प्रचयस्वर-धर्म-वत् ऋप्रा ३, २२.
प्र-चित,ता- -तः[b] माशि २, ४; ५; -तम् माशि ५,६; -ता[c] याशि १, ७१; -तात्[b] माशि ५, ६; -ताम्[c] याशि १,७१; -ते माशि ४,१२[b].
†प्र-चिन्वत्- -न्वद्भयः भागृ २,९ : १३; -न्वन्तः भागृ २,९ : १३.
प्रचिक[d]- (>प्राचिक्य- पा.) पाग ५,१,१२८.
†प्र √चित्, प्र…चेति कौसू ५,२. प्रचेतयति या ११, २७∳; प्रचेतय आश्रौ ६,२,९; ३,११; क्षुसू १,७ : ५.
†प्र-चेतन[e]- -०न आश्रौ ६,२,९; ३,११.
प्र √चुद्, प्रचोदयति भाश्रौ ८, ११, १९; †प्रचोदयात् शांश्रौ २,१०, २; बौश्रौ ३, ९ : ५; आग्निगृ; प्रचोदयेत् शांगृ ४,८,१२; बौध २,१०,४३.
†प्र-चोदयत्- -यन् या ६, ७; -यन्तौ या ८,१२∳.
प्र-चोदयमान- -नौ या ८, १२.
प्र-चोदित- -तः बृदे ५, ७५; ऋप्रा १५,८; शैशि २४०.
प्रचुर[f]-> प्राचुर्य- > °र्य-दंश-मशक- -कैः अप ६५, २, ६.
प्रचुल[g]- (>प्राचुल्य- पा. L>प्रा-चुल-J पा.) पाग ४, १, १०५; २,१११.
प्र √चृत्, प्रचृतति कौसू ५,१८; ६६, २९.
प्र-चृतत्- -तन्तः कौसू ३४, १७.
१प्र-चेतस्[e]- -०तः ऋप्रा ४, ४०; -†तसः आपश्रौ २०,२३,४[h]; बौश्रौ[h] १५,३८:१; २८,१:२३; वैश्रौ २०,३३:१३[h]; हिश्रौ १४, ५, १३[h]; आग्निगृ २,३,५:१२[h]; कागृ ४०, ९; या ९, २०∳; शुप्रा ४,७८; पावा ८,२,७०$; -तसम् अअ ४, ५३; -तसा माश्रौ ५, २, ८, २०†; -तसौ ऋअ २, १, १३; -†ताः शांश्रौ ६,१२,१६; आपश्रौ १७,७,७; २४,९; बौश्रौ; वैश्रौ १९,५ : ४२?[i]; या ८, ५∳.
२प्रचेतस्[g]- -ताः ऋअ २,१०,१६४; अअ ६,४५; २०,९६.
प्राचेतस- -सः शंध २९०.
प्र √च्छद्, प्रच्छादयति काश्रौ २०, ६,१५; आपश्रौ १५,१५,१[2]××; काठश्रौ; प्रच्छादयन्ति कौसू ८१, २५[j]; प्रच्छादयीत पागृ २, ६, २२; प्रच्छादयेत् बौश्रौ २६, २७ : ३; वैश्रौ १८,१६ : ८१; ८४; आगृ.
प्र-च्छन्न,न्ना- -न्नः बौश्रौ २२, १९ : ४; -न्ना आपश्रौ ११, ५, ६[k]; -न्नाः विध १६, १७; -न्नाम् वैश्रौ १४,४ : १७[k].
प्रच्छन्न-पाप- -पाः विध २२, ९०; -पानाम् वाध २०, ३.
प्र-च्छाद[l]- -दम् बौश्रौ २५,३० : १२; २६, २७ : २.
प्र-च्छादन- -नम् बौश्रौ १९, १० : ५५; माश्रौ २,४,५,३; बौध १,

a) =एकश्रुति- (तु. पा १, २,३९)। b) =प्र-चय-। c) =ऊष्म-भेद-। d) अर्थः व्यु. च ?। e) वैप १ द्र.। f) = बहुल-। व्यु.?। g) =ऋषि-विशेष-। व्यु.?। h) पाभे. वैप १, २१२० b द्र.। i) °तः इति पाठः? यनि. शोधः (तु. आपश्रौ १७, ७, ७)। j) °यति इति मूको.। k) सपा. °न्ना<> °न्नाम् इति पाभे.। l) नाप.। उप. घञ् प्र.।

६,१८.

प्रच्छादना(न-अ)र्थ- -र्थस्य हिश्रौ ७,८ : १७.

प्र-च्छादित- -ताय विध ८७,६.

प्र-च्छाद्य शांश्रौ ४,१४,१७; काश्रौ.

प्र√च्छिद्, प्रच्छिनत्ति बौश्रौ २, ९ : २१; आगृ १, १७, १०; द्रागृ १,२,१२.

प्रच्छिद्यते अप ६७,६,३; प्रच्छिद्यन्ते अप २३,४,४.

प्रच्छेदयति बौश्रौ ४,१ : ३०.

प्र-च्छिद्य आपश्रौ ९,१९,१२; १४, ३३,२××; बौश्रौ; प्रच्छिद्यऽप्रच्छिद्य आगृ १,१७,११.

प्र-च्छिन्न- >प्रच्छिन्ना(न्न-अ)ग्र[a]- -ग्रम् आपश्रौ २४,१३, १†; -ग्रेण आपश्रौ १५,१०,६.

प्र-च्छेद- -दम् काश्रौ ६, ९, १०; ८,२,२१; बौश्रौ ४,१० : ७.

प्र√च्यु, प्रच्यवते क्षुसू ३, १ : १४; १० : २०××; निसू; †प्रच्यवस्व आपश्रौ १०,२९,१; बौश्रौ ६, १६ : ५; भाश्रौ; हिश्रौ ७,३, १८?[b]; †प्रच्यवेथाम् कौसू ८२, ४०; अअ १८,४; प्रच्यवेत क्षुसू ३, ३ : १६; ४ : ५; †प्र··· च्यवेत आपश्रौ १७, १७, ७; वाधूश्रौ २, ९ : ४; हिश्रौ १२, ५,३७.

प्रच्योष्ट निसू ६,६ : १७; ११ : ३६××; प्र···अच्योष्ट वाधूश्रौ ४, १६ : १४; प्रच्योषाताम् निसू ८,७ : ४०.

प्रच्यावयति बौश्रौ ८, १५ : ७; वाधूश्रौ ४, ८८ : ९; हिश्रौ ९, ४, ३८; निसू ७, ६ : १४?[c]; प्रच्यावयतः वैश्रौ १२,२० : ९; प्रच्यावयन्ति आपश्रौ ७,२८,४; बौश्रौ ६, १६ : ५; निसू ९, ५ : ४; प्रच्यावयतु या ७, ९†; †प्र···च्यावयतु आश्रौ ६,१०, १९; आग्निगृ ३,५,४ : १; बौपि १,३ : १२; या ७,९; †प्रच्यावयन्तु आपश्रौ १३, १६, १; बौश्रौ ८, १५ : ८; वैश्रौ १६, १९ : ८; हिश्रौ ९, ४, ३८; †प्रच्यावयतात् काश्रौ ६, ८, १; बौश्रौ ४, ८ : ८; प्रच्यावयेत् बौश्रौ२०,२९:५;२८,११ : १६.

प्र-च्यावन- -ने बौश्रौ २०, २९ : ५; २१,२३ : २३.

प्रच्यावनी[d]- -नीम् आग्निगृ ३, ५,२ : १५; बौपि १,२ : १८.

प्र-च्यावयत्- -यन् बृदे २, ६०; -यन्तः बौपि १,४ : २५.

प्र-च्युत,ता- -तः हिश्रौ ९,५,३६†; वैताश्रौ २४, १; -तम् निसू ५, १ : ११;२०××; -†तस्य काश्रौ ६, ८, १; बौश्रौ ४, ८ : ८; -तानि अप ५८[२], १,५; -ताम् निसू ३, ९ : ३७; ४२; ८, ७ : ३३; अअ ८,९†; -ते काश्रौ ६, ८,२; भाश्रौ ७, १८, ३; निसू ८,७ : ३९; -तौ निसू ७,९:६.

प्र-च्युति- -तिम् आश्रौ २, १०, १४†[e].

प्र√च्युत्, प्रच्योतयति बौगृ १,९,६.

प्र-च्युति(त>)ता- -ताया्म् गोगृ ३,१०,३०.

प्र√जन्, प्रजायते शांश्रौ ३,८,२७†; आपश्रौ २३, १४, १५†; बौश्रौ; या १४, ६; प्र···जायते शांश्रौ १०,१४,८†; आपश्रौ २१,१,१; २२,२२,८; वाधूश्रौ; प्रजायन्ते बौश्रौ २०, १० : १७; वाधूश्रौ; प्र···जायन्ते शांश्रौ १०, १४, ८†; आपश्रौ २३, २, ९; १७; †प्रजायसे आपश्रौ ८, २१, १; बौश्रौ ५, १८ : १९; हिश्रौ; †प्रजायताम् आपमं १, ८, १; मागृ २,१८,२; †प्र···जायताम् काश्रौ २५, १२, ८; आपश्रौ ९, १७, १; हिश्रौ १५, ७, २३; प्र(जायताम्) बृदे ७, १०३†; †प्र···जायन्ताम् कौसू ११४, २; १२८,२; †प्रजायस्व आपश्रौ ७, १३, २; बौश्रौ ४, ५ : ११[३]; भाश्रौ; †प्रजायध्वम् आश्रौ २, ५, १७; शांश्रौ १२, १५, १[f]; आपश्रौ; हिश्रौ १५, ७, २३[f]; द्राश्रौ ७, ३,२[f]; बौगृ १,५,८[f]; वैगृ ३,५ : ६[f]; अप्राय ५, ५[f]; प्रजायावहै वाधूश्रौ ४, १९ : ४२; ३३ : ५; प्राजायत शांश्रौ १४, ६, १; ६५, १; ६८, १; बौश्रौ १६, २८ : १८; प्राजायेताम् वाधूश्रौ ४, १९ : ४५; प्राजायन्त शांश्रौ १४, ६०, १; बौश्रौ १४, २० : ५; प्रजायेत आपश्रौ १४, १३, ३; माश्रौ ५, २, १४, १४; हिश्रौ; प्रजायेरन् वाधूश्रौ ४,३१ : ७; †प्रजायेय शांश्रौ १०,१४,२; आपश्रौ १४, १३ : ६; वाधूश्रौ ४, ५ : १; १४ : १.

---

a) विप. । बस. । b) प्रच्यवस्य इति पाठः? यनि. शोधः (तु. आपश्रौ.) । c) प्रा॰ इति पाठः? यनि. शोधः । d) =कुम्भी-विशेष- । e) पाभे. वैप १ हुस्तच्युतिम् मै २,७,१२ टि. द्र. । f) पाभे. वैप १, २१२२ i द्र. ।

†प्रजज्ञे शांश्रौ ४, १२, १०; बौश्रौ; †प्र···जज्ञे हिश्रौ २२, ४, १४; चाश्र ४१ : ९; प्रजनिष्यन्ते बौश्रौ १४, २० : ३; †प्रजनिष्येथे[a] आपश्रौ ५, ८, ८; बौश्रौ २,१५ : १३; †प्रजनिषीय आपश्रौ ४,१०, १[b]; माश्रौ १, ४, २, ६[c]; वाश्रौ १, १,३, ६[c]; हिश्रौ ६,४,१[b];४२; †प्र···जनिषीय आपश्रौ ४,१०, १; बौश्रौ २७,१४ : ५; वाश्रौ १, १,३,६; †प्रजनिषीमहि आपश्रौ ९,६,७; बौश्रौ ९,१६ : १२; हिश्रौ १५, २,१४; †प्राजनि शांश्रौ ३,२०, ४; काश्रौ २५,२, २४; आपश्रौ; प्र···अजनिष्वहि वाधूश्रौ ४, १९ : ४६.

प्रजनयति †बौश्रौ १३,७ : १९; १४,२४ : ३६××; भाश्रौ ६, १०, ७; हिश्रौ १५, १, ७६; प्रजनयन्ति वाधूश्रौ ४, ८२ : २; †प्रजनयतु आपश्रौ ९, ६, ७; बौश्रौ ९, १६ : ११××; हिश्रौ १५, २, १४; प्र···जनय, प्र (जनय) आपमं १, १४, ३; †प्रजनयावहै[d] आगृ १, ७, ६; कौगृ १,८,१८; शांगृ १, १३,४; पागृ; प्रजनयेत् अप ६३, ३,५. †प्रजनयिष्येते[e] माश्रौ १,५, २, ४; वाश्रौ १, ४,१,१९; †प्रजनयिष्यतः[e] माश्रौ १, ५, २, ४; वाश्रौ १,४,१,१९; प्रजनयिष्येथे हिश्रौ ६, ५, १०†[a]; प्रजनयिष्यथः[e] आपश्रौ ५, ८, ८; बौश्रौ २,१५ : १४; हिश्रौ ६,५, १०.

प्रजनयां √कृ,प्रजनयामकः पा ३,१,४२†.

प्र-जन[f]– -नः वैश्रौ २०, १ : ३; –नस्य पावा ४,१,९२; –ने पा ३,१ १०४; ३, ७१; ६,१,५५; –नेन निसू ८,२ : २८.

प्रजन-संबन्धा(न्ध-अ)पेक्षा– -क्षा हिश्रौ ३,१,५.

प्र-जनन,ना[g]– -†नम् शांश्रौ ४,१३, १; आपश्रौ ६,११,५;१८,६,२; २०,१८,४; बौश्रौ; लाश्रौ ३,५, ५?[h]; –नस्य वाधूश्रौ ४, ३१ : ६;९७[2] : ७; ११६ : ५; –नाम् कौसू ६९,२०; –†नाय बौश्रौ २, १३ : ५;१८,१० : ६;१४; जैश्रौ; –ने वैश्रौ १,१० : ९;१०, १० : ६; हिश्रौ १४,४, १०; वाध ८, ११; –नेन आपश्रौ २०,१८,४; माश्रौ ५,२,२,१५.

प्रजनन-कर्मन्– -र्म या ११,३१.

प्रजनन-काम– -मः आपश्रौ २२, ६,१; हिश्रौ १७,२, ४६; –माः कौसू १९,२.

प्रजनन-निमि(त्त>)त्ता[i]– -त्ता बौध २,९,२.

प्रजनन-यज्ञ– -ज्ञस्य या ३,४.

प्रजनना(न-अ)र्थ– -र्थः भागृ १, ११ : ५.

†प्र-जनयत्– -यन् आपश्रौ १२,२२, ८[2]; बौश्रौ ७, १३ : २०; २२; हिश्रौ ८,७,१४[2]; –यन्तः शांश्रौ १६,२३, १३; –यन्तौ वाधूश्रौ ४,२७ : १७.

प्रजनयन्ती– -न्तीः वाधूश्रौ ४, ९७ : ११.

†प्र-जनयितवे आपश्रौ ५, १, ४; बौश्रौ २,६ : ३४; हिश्रौ ३,२,३.

प्र-जनयिष्यमाण– -णः शांगृ १,१९, २[j]; –णाः आश्रौ १०,५,१२.

प्र-जनिष्णु– पा ३,२,१३६.

प्र-जनिष्यमाण– -णः कौगृ १,१२, २[j].

प्र(ज>)जा[g]– -जया आश्रौ १, ३,२८†;६,१२,४†;१०,५,१२; शांश्रौ १,४,५××; २,११,५†[k]; ९,५,१†[l]; काश्रौ;†आपश्रौ १[m], १२,११; १४;१७; ५, १४,५[n]; ६, १९,७[o]; ९,१४,१[p]; †बौश्रौ ३,८ : १४[k];२१ : १२[k]; ८,१७ : ३[n];१४,८ : २८[p]; १७, ३ : २[l]; †भाश्रौ १, १२, ६[m]; ३, १२, ७××[k]; ४, २१, ५[k]; †वाश्रौ १. २, २, १७[m]; ३, २, २५[o]; †वैश्रौ २,८:११[o]; ३,७ : ८[m];७, १३:७[k];१७,१५:३[k]; †हिश्रौ १, ३,३४[m];३,४,२८[n]; ६,४,२३[k]; ६,१९[o]; ८,१,७६[l]; ९, ७,२१[l]; १३, २,९[k];१६, ५, १[o]; †जैश्रौ १३, १५ : ८[l]; २० : ३[n]; वैताश्रौ १३, २३†[q]; आपमं १, ९, ४†[r];

a) परस्परं पाभे.। *b*) पाभे. वैप १, २१२२ p द्र.। *c*) पाभे. वैप १,२१२२ q द्र.। *d*) पाभे. वैप १, ६३३ g द्र.। *e*) परस्परं पाभे.। *f*) =प्र-जनन-। *g*) वैप १ द्र.। *h*) अभ्यात् संप्र॰ इति पाठः? यनि. च अभ्यातमम् इति च शोधः। *i*) वि.। बस.। *j*) परस्परं पाभे.। *k*) पाभे. वैप १, २१२४ d द्र.। *l*) पाभे. वैप १,२१२४ e द्र.। *m*) पाभे. वैप १,२१२४ j द्र.। *n*) पाभे. वैप १,२१२४ f द्र.। *o*) पाभे. वैप १, २१२४ g द्र.। *p*) पाभे. वैप १,१६८८ i द्र.। *q*) पाभे. वैप १ दृष्टव्या मा १२,७ टि. द्र.। *r*) पाभे. वैप १,२१२४ c द्र.।

कौगृ १,९,१७†[a]; आग्निगृ १, १, ३:२७†[b]; जैगृ १,२२:४†[a]; –जा आश्रौ ९, ५, १४; शांश्रौ १४,७, १××; आपश्रौ; या ३, १; –जाः आश्रौ १०, ३, १२; ११, ६,८; शांश्रौ; †आपश्रौ ४, १,१०[c]; १२,२२,८[2d]; †बौश्रौ ४,६:३५[c]; ७, १३:२२[d]; ११, ४:१९[c]; †भाश्रौ ४, २, २[c]; ७, १३, ४[c]; वाश्रौ १, ६, ५, १†[c]; †वैश्रौ १०,१३:११[c]; १५, २८:७[d]; ८[d]; †हिश्रौ १,२, ५[c]; ८, ७,१४[2d]; कौगृ १,२, ३†[e]; गो २, १८†[c]; †या १०, ३४; १४, १६; –जानाम् आश्रौ ६, १४, १६†[f]; शांश्रौ ४,१०,१†; आपश्रौ ५,१,७××; २२,१७,१०; बौश्रौ; हिश्रौ १७,६, ४४?[g]; या १०, ४२; –†जाभिः आश्रौ २, ३,२७[h]; शांश्रौ; वैताश्रौ २५,१२[i]; कौसू १२४,४[i]; –†जाभ्यः शांश्रौ ३,२०,२; काश्रौ ७, ७, १७; आपश्रौ; आगृ १,७,१९[j]; कौगृ १, ८, २८[j]; कागृ २५, ४२[j]; मागृ १, ११, १८[k]; वागृ १४, २३[l]; जैगृ १, २१:२९[l]; –†जाम् आश्रौ १, ११, १; ८××; शांश्रौ; आपश्रौ १७,१२, २[l]; २१,१५,१$[m]; माश्रौ ६,२, ३,८[n]; वैताश्रौ २५,१?$[o]; आगृ १, ७, ६[p]; कौगृ १, ८, १८[p]; शांगृ १,६,६[o]; १३,४[p]; पागृ; या ९,२२$; ११,७; ३२; –†जायाः आश्रौ २,५,१२[q]; शांश्रौ २,१५, ५[q]; ९, २८, ३[r]××; आपमं; कौगृ १, १४, ६[f]; बौगृ १,१०, ४[f]; या ८,५; –जायाम् शांश्रौ १६, २३, ६; १४; काश्रौ; या ४, १७; –†जायै शांश्रौ ७, ५, १४; १३, १२, १३[r]; १७, १२, १; आपश्रौ; –जासु काश्रौ ४, १५, १५; आपश्रौ ५,२,१†; बौश्रौ.

प्रजा-काम,मा– -मः आश्रौ १, १०,६†; ९, ७, २८××; काश्रौ; हिश्रौ १७, २, ४५[s]; –मम् आपश्रौ १४, १३, १०; २२,४, २××; हिश्रौ; –मस्य शांश्रौ १, १५, ३; १४, २२, २५; काश्रौ; –मा आश्रौ १, ११, २; माश्रौ ४, १, ३३[2]; –माः आश्रौ १२, ५,६; आपश्रौ; –मानाम् शांश्रौ १,७,३; काश्रौ २४,२,१३; २२; ३५; बौश्रौ १६, ४:२; माश्रौ ४,१, ३; –माय आपमं २,११, ४†; –मायाः कौसू ३५, १७; –मौ कागृ ३०,४.

प्रजाकाम-पशुकाम– -मयोः काश्रौ २२, ११, १२; –मस्य आपश्रौ ५, २८, १२; १०, ४, ४†.

प्रजा-क्षय[t]– -ये अशां १७, २.

प्रजाक्षय-कर– -रम् अप ३०[2],१,७.

प्रजा-गुप्ति– -प्तये आपध २,२६, ४; हिध २,५,१९९.

†प्रजा-(हन्>)घ्नी– -घ्नी आपमं १, १०, ३; ६; पागृ १, ११, २; ४; बौगृ १, ६, १२; भागृ १,१९:१४ जैगृ १, २२: १५.

प्रजा-तन्तु– -न्तुम् आग्निगृ १, ६, १: १†.

प्रजा-दान– -नम् आपध २,२३, ८; हिध २,५,१६१.

प्रजा(जा-आ)दि– -दीन् अअ ७,३३.

प्रजा-धर– -०र विध ९८,६४.

प्रजा-निश्रेयस[u]– -सम् बौगृ १, ७,४६[v].

प्रजा-निः[,श्[w]]श्रेयस– -सम् आपगृ ९, १[v]; आपध १,९,१३; हिध १, ३, १३; –साय आपध २,१६,२; हिध २, ५,२?[x].

प्रजा-पति– पाग ४, ४, ४८; –तये आश्रौ २,९,९†; †शांश्रौ ७,१८,५; १३, १२, ८; काश्रौ;

a) पाभे. वैप १, २१२४ c द्र.। b) पाभे. वैप १,२१२४ f द्र.। c) पाभे. वैप १,२१२५ h द्र.। d) पाभे. वैप १,२१२५ e द्र.। e) सपा. प्रजाः<>प्रजाम् इति पाभे.। f) पाभे. वैप १,२१२६ h द्र.। g) °ताम् इति पाठः? यनि. शोधः (तु. आपश्रौ २२, १७,१०)। h) पाभे. वैप १, २१२४ g द्र.। i) पाभे. वैप १,२१२४ e द्र.। j) पाभे. पू १५४९ w द्र.। k) पाभे. वैप २, ३खं. व्रताय तैब्रा ३,७,७,११ टि. द्र.। l) पाभे. वैप १,२१२६ d द्र.। m) सपा. प्रजां भूतिम्<>प्रजातिम्<>प्रजापतिम् इति पाभे.। n) पाभे. वैप १ यज्ञम् तै ३,५,१,१ टि. द्र.। o) पाठः? °जाः इति शोधः (तु. C., सपा. तै ३,५,२,३ तां १,१०,१ च)। p) पाभे. वैप १,२१२८ e द्र.। q) पाभे. वैप १,२१२८ i द्र.। r) पाभे. वैप १, २१२८ k द्र.। s) सपा. आपश्रौ २२,५,१८ स्वर्गकामः इति पाभे.। t) उप. <√क्षि [क्षये]। u) उप. = निःश्रेयस-। v) परस्परं पाभे.। w) आपध. पाठः। x) °सा च इति पाठः? यनि. शोधः (तु. आपध.)।

या १२,८; –तिः †आश्रौ १, ११,७; २, २,४××; शांश्रौ २, ६, ७†××; ९, ५,१†[a]; काश्रौ; बौश्रौ १७, ३ : २†[a]; माश्रौ १, ४, २,१२†?[b]; हिश्रौ ९, ७, २१†[a]; जैश्रौ १५ : ९†[a]; वैताश्रौ २७, १६[२c]; पागृ १, ८, ८†[d]; मागृ १,१०,१३†[d]; १४,१६†[e]; कौसू १२४, ४[a]; अप १,४,१[f]; २, १, ७[g]; ऋअ १, २, १०[g]; २[h], ३, ३८; ५४; ९, ८४; १०१; शुअ[h] २, १; ३८१; ३,२; अअ[h] २, ३०; ४, ३५; ६, ११; निघ ३, १७[i]; या १०, ४२ॐ; वेज्यो ३२[i]; –तिना काश्रौ २०, ३, १०; आपश्रौ; आपमं २, ५, २२†[j]; बौगृ २, ५, २६†[j]; –तिम् आश्रौ २,३, १९; ८,१३,२६†; १०,९,५†; शांश्रौ; हिश्रौ १६, ५, १४[k]; १८,४, ६५[k]; वैताश्रौ ३, २०[l]; शंध ११६ : ३६; अअ४,१५?[m]; –तीन् शंध ११६ : ३०; –†०ते आश्रौ[n] २,१४,१२; ३,१०,२३; शांश्रौ १,४,५××; १६, ७,३[n]; काश्रौ २, २,११; १५, ६, ११[n]; आपश्रौ १, १०, ८[n]; २, ११, २[n]××; ९,२,४[n]; १२,४[n]; १३, ६, ११[n]; १२, १२[n]; १८, १६, १४[n]; बौश्रौ १, २१ : २४[n]××; २, १३ : ८[n]; ३, ११ : २७[n]; ५, १५ : ३२[n]; १२, ११ : ११[n]; भाश्रौ; माश्रौ १, १,२, ३८[n]; वाश्रौ १, २, ३, ३१[n]; वैश्रौ[n] १६, ८ : ७; २०, ५ : ३; २५ : ६; हिश्रौ २, ६, २[n]; ९, २, १७[n]; १३, ६, ३३[n]; १५, ७, २१[n]; वैताश्रौ[n] १,३; २,१२; ७, १२; आपमं १,११, ४; २, २२, १९[n]; आगृ[n] १, ४, ४; १४,३; २,४,१४; कौगृ[n] १,८, २६; ११, ४; १४, ६; शांगृ[n] १,१८,४; २२,७; आग्निगृ[n] १, १,४ : ५१; ५,४ : १३; २, १, १ : ४; २ : ४; ५ : २४; २, ४ : ३; ५ : ३; ४, १ : ५; २ : ८; ५ : १०; ५, १ : २९; ७, २ : २६; ९ : २९; ३,२,२ : ९; ६ : १०; कागृ २२, २[n]; ३४,४[n]; ३६, १[n,o]; बौगृ[n] १, ४, ३३; ४, २, १; भागृ[n] १,६ : १६; १४ : १५; २८ : ८; २,२ : १२; ६ : १३; ३२ : ८; ३, १९ : १४; वैगृ[n] १, १७ : २; २, ९ : ८; ४,३ : १४; ६ : ९; हिगृ[n] १, ३, ६; ८,१६; ९, ७; १७, ६; १८,६; १९, ८; २६, १४; २७, १; २८,१; २, १,३; २,२; ४,१०; ५,२; ६,२; १५, १३; गोगृ ४, ६, ९[n]; जैगृ[n] १, ४ : १३, २० : ३१; कौसू ५, ९[n]; अप ४५,१,२४[n]; अशां १८, ७[n]; शुअ[n] १, ६१५; ३, ४०; अअ ७, ८०[n]; या १०, ४३[n]; उसू ८, ३५[n]; –तेः †आश्रौ १, १३, ४; ३, ११, ११; शांश्रौ; आपश्रौ २१, १२, ३†[p]; हिश्रौ १६, ४, ३५†[p]; शुअ[h] १, १५५; १६३; १७२; २११; २३०; २, ४; ३६२; ३, ७७; चाअ १ : ६[h]; १६[h]; –†तौ आपश्रौ ६, ९, १; ११, १, ६; बौश्रौ.

प्राजापत– पा ४, ४, ४८.

प्राजापत्य,त्या[q]– -त्यः आश्रौ २, १४, ११; ३, ८, ६; शांश्रौ; विध २४, १८[r]; ऋअ[h] २, ५, ३३; १०, १९; १२१; १३०; १६१; १७७; १८३; १८४; शुअ[h] १, १४; ६१८; ३,४९; साअ १, १७१[h]; –त्यम् आश्रौ ३, ४, १२; १०, ३, ६; शांश्रौ; बौश्रौ १३,३६ : १?[s]; क्षुसू[t] १, २ : ८; ३ : ३; १०; १९; ४ : ६; ११ : ३०; २, ३ : ६; ४ : ११; अप ५७, ४, १[u]; ७०[२],१६,५[v]; शंध ५४[w]; १५२[x]; ३९५[x]; ४०१[x]; ४०६[x]-४०८[x]; ४५०[x]; ४६०[x]; विध

a) पाभे. वैप १,२१२९ c द्र. । *b*) पाठः ? °तिम् इति शोधः (तु. गोब्रा २,१,७) । *c*) एकतरत्र पाठः ? °तये? इति C. शोधः । *d*) पाभे. वैप २,३ खं. बृहस्पतिः मंब्रा १, २, २१ टि. द्र. । *e*) सपा. °तिः <> °ते इति पाभे. । *f*) =नक्षत्र-देवता- । *g*) =देवता- । *h*) =ऋषि-विशेष- । *i*) यज्ञ-नामन्- । *j*) सपा. हिगृ १,१३,१९ ब्रह्मणा इति पाभे. । *k*) पाभे. पृ १६५८ *m* द्र. । *l*) पाभे. वैप २,३खं. प्रजापतिम् गोब्रा २,१,७ टि. द्र. । *m*) °तिः इति पाठः ? यनि. शोधः । *n*) पाभे. वैप १,२१३१ *a* द्र. । *o*) °तये इति पाठः ? यनि. शोधः (तु. पूर्वं स्थलम्) । *p*) °ते इति C. । *q*) विप. (सूक्त-, स्थाली-पाक-, उदुम्बर- प्रमृ.), व्यप. । वैप १ द्र. । *r*) =विवाह-विशेष- । *s*) प्रजा° इति पाठः ? यनि. शोधः । *t*) =साम-विशेष- । *u*) =नक्षत्र- (रोहिणी-) । *v*) =कर्म-विशेष- । *w*) =तीर्थ-विशेष- । *x*) =व्रत-विशेष- ।

२२,१६[a,b]; ३८,७[b]; ५१,४५[b]; ५३,१[b]; ७[b]; ६२,१[c]; वैध २[b], १,२; ६, २; काध २७१ : ६[b]; –त्यया[d] आपश्रौ ९,२,४; २०,१; १२,८,९?[e]; १३,१२,१२; बौश्रौ; वैश्रौ १५,९ : ११; –त्यस्य शांश्रौ ९,२३, ९; १६, ७, ४; काश्रौ; आपश्रौ १६,७,११; वैश्रौ १८, ५:१४?[f]; बृदे ८,८०[g]; चाअ २: १४[g]; ३०:६[h]; –त्या शांश्रौ १४, ३, १९; आपश्रौ ६,३१, ११[i]; १९,१६,१०; बौश्रौ; अशां १६, १[j]; ऋअ २,१०,१०७[k]; बृदे ७, ४९[l]; ऋप्रा १७,९; माशि १,४; याशि १, ५०; पिं २, ५; उनिसू ३ : १९; –त्याः आश्रौ ३, ८, १; १०, ९, ५; शांश्रौ; या ७, ४; –त्यात् आपश्रौ १६, १३, ५; बौश्रौ २५, १८ : १०; वैश्रौ; गौध ४, ३२[m]; –त्यान् काश्रौ १४,२,१३; आपश्रौ १८, २,३; १३; २०, २२, ४; बौश्रौ; वाध १४, १६; २४; ३०; –त्यानाम् काश्रौ १४, २, २०; २०, ८, २; बौश्रौ; –त्यानि आपश्रौ २, १०, ४†; १८, १, १५; बौश्रौ; निसू १,१२ : ६; आग्निगृ १,२, १ : ९[n]; बौगृ ३, १,२१[n]; शुअ १, ५७२; उनिसू ८ : २४; –त्याभिः शांश्रौ १३, ५,७; १२,९; आपश्रौ; –†त्याभ्याम् अप ४६, १०, २६; अअ १९,२३; –त्याम् आपश्रौ १७, ९, ३[o]; १९, २१, १; बौश्रौ २, १३ : ७; १०, ३६ : ८[o]××; १३, २३ : १[i]; भाश्रौ; वैश्रौ १९,६ : ७[o]; हिश्रौ २२, ४,१[i]; अप ७०[r], १३, २[j]; अशां १७, २[j]; विध ९६, १[i]; –त्याय आपश्रौ २१,१०,१; हिश्रौ १६, ४,१४; –त्यायाः पिं २, ११; –त्यायाम्[j] अशां १८, ३; १९, २; –त्यायै बौश्रौ २०, २१ : ६; ८; –त्यासु बौश्रौ १६, ३१ : १७; १९; –त्ये आश्रौ ३,२,८; ४, १२; शांश्रौ; वैगृ २, १० : १०[b]; अप ३३, ४, १[p]; वाध १२,४७[q]; १७, ६१[q]; गौध ४, ७[m]; –त्येन शांश्रौ १३, २०,८; आपश्रौ ६, १७, १०[r]; १६, ८, २†; २२, २२, १५[s]; माश्रौ; आग्निगृ ३,१२,१:५[b]; वैगृ ३,१: १४[m]; वाध १८,१६[b]; २७,१७[b]; शंध ९६[c]; बौध ४,५,३०[b]; विध २४,३६[m]; –†त्येभ्यः आगृ २,३, ५; मागृ २,७, १; –त्येषु वैश्रौ १७,१६ : ५; मीसू १०, ४, ६; –त्यैः मीसू ११, ३, ४५; –त्यौ काश्रौ २०, ८, १५; बौश्रौ १८, ४५ : ४१.

प्राजापती– -त्या भागृ ३, २ : १२; –त्याः निसू ४,९ : ५.

प्राजापत्य-द्वय– -येन शंध ४४९[r].

प्राजापत्य-प्रथम[t]– -मान् वैश्रौ १८,४ : १४.

प्राजापत्य-भाजन– -नम् आग्निगृ २, ३, १ : ११.

प्राजापत्य(त्य-ऋ)र्च्– -त्यर्चा काश्रौ २५, १४, १८; माश्रौ ३,२,७.

प्राजापत्य-वपा– -पानाम् काश्रौ २०,७,९.

प्राजापत्य-वर्जम् वाश्रौ २,१,२,१२.

प्राजापत्य-व्रत-बन्ध– -न्धम् वैगृ २, ९ : १०; १२ : १६.

प्राजापत्य-व्रत–बन्ध-ना(न—आ)दि– -दि वैध २, ३, २.

प्राजापत्य-सूक्त– -क्तम् वैध २,३,२.

प्राजापत्या-गायत्री– -त्र्यः अअ १९,२३; –त्र्यौ अअ १९,२२.

प्राजापत्या-जगती– -त्यौ अअ १५,४.

प्राजापत्या-त्रिष्टुभ्– -ष्टुभः अअ १९, १८; –ष्टुभौ अअ १५,१२.

प्राजापत्या(त्य-आ)दि– >°त्यादि-मूलहोम– -मः वैगृ १,१८ : १४.

---

a) °त्यव्रतम् इति जीसं. । b) =व्रत-विशेष- । c) =तीर्थ-विशेष- । d) =ऋच्- [<प्रजापते ऋ १०,१२१,१०] । e) अप्रा° (तु. भाष्यम्) इति पाठः? यनि. शोधः (तु. सप्र. वैश्रौ १५,९:११; C. च) । f) °तस्य इति पाठः? यनि. शोधः (तु. आपश्रौ.) । g) =प्रजापति-पुत्र- । h) =ऋषि-विशेष- । i) =इष्टि-विशेष- । j) =महाशान्ति-विशेष- । k) =प्रजापति-दुहितृ- (दक्षिणा-) । l) =प्रजापति-दुहितृ- (विकुण्ठा-) । m) =विवाह-विशेष- । n) =काण्ड-विशेष- । o) =इष्टका-विशेष- । p) =नक्षत्र- (रोहिणी-) । q) =मुहूर्त-विशेष- । r) =तृच- । s) =षडह-विशेष- । t) विप. । बस. ।

प्राजापत्यादि-वेद-व्रत- -तानि वैगृ ६,११ : ६.
?प्राजापत्याद्यपात्र- -त्रम् वाश्रौ ३,४,२,१४.
प्राजापत्या(त्या-अ) नुष्टुभ्- -ष्टुभः अअ ११, ३; १२,५(३;५)××; -ष्टुभौ अअ १३,४(२-४;६);१५,१२;१३.
प्राजापत्या-बृहती- -त्यौ अअ ९,३; १५,११.
प्राजापत्या(त्य-आ) श्वमेधिक- -के बृदे २,१५३.
प्राजापत्यो (त्या-उ) ष्णिह्- -ष्णिहः अअ १५, १६; -ष्णिहौ अअ १२,५ (६); १५, १७.
प्रजापति-काम- -मः निसू ६,६ : २१; ८ : ३५.
प्रजापतिकाम-यज्ञ- -ज्ञः निसू २,३ : १७.
प्रजापतिकाम-सत्र- -त्रम् निसू १०,४ : १;१३ : ७.
प्रजापतिकामसत्र-त्व- -त्वात् निसू १०,१३:१२.
प्रजापति-गीत- -तौ बौध २,४,१५.
प्रजापति-गृहपति- -तयः आश्रौ ८,१३,७; १०†.
†प्रजापति-गृहीत,ता- -तया[a] बौश्रौ १०, ३५ : ६; १४, २२ : ११; -तेन[a] वाश्रौ ३,२,१,३२.
प्रजापति-च्छन्दस- -सानि वाधूश्रौ ४,१००[२] : १.
प्रजापति-तस्(:) बृदे ७,५०.
प्रजापति-त्व- -त्वेन शुअ ३, ८१.
प्रजापति-देव(त>)ता[b]- -ताः बृदे ८,१०८.
१प्रजापति-परिवाद- -दः आपश्रौ २१,१२,१.
२प्रजापति-परिवाद[b]- -दान् आपश्रौ २१,१२,२[c]; -दानाम् हिश्रौ १६,४,३५[c].
प्रजापति-पीत- -तम् वाश्रौ ३,२,२,३१.
प्रजापति-पुरोग[b]- -गान् वैगृ १,१३ : १.
प्रजापति-प्रवाद- -दः निसू ६,३ : ५.
प्रजापति-मुख- -खात् चाअ ४२ : १९.
प्रजापति-युक्त- -क्तः बौश्रौ ३,२३ : ७†.
प्रजापति-राजन्[b]- -जानः शांश्रौ ४,२१,१२†.
प्रजापति-रूप- -पेण शुअ १,४९९.
प्रजापति-संस्ताव- -वेषु निसू ४,६ : ७[d]; -वौ निसू ७, १२ : ४?[e].
†प्रजापति-सृ(ष्ट>)ष्टा- -ष्टानाम् आपश्रौ ५, १, ७; वैश्रौ १,७ : ३.
प्रजापति-हृदय[f]- -यम्[g] काश्रौ १८, ३, २; लाश्रौ १, ५, १६.
प्रजापतिहृदय-स्थान- -ने लाश्रौ १,५,१८[h].
प्रजापती(ति-ई)प्सा- -प्सया निसू ६, १० : ३६; -प्साम् निसू ६,१० : ३२; १०,३ : १; १३ : १६.
प्रजापतेर-अयन- -नम् बौश्रौ १६,१६:४-६;२६,१७:९.
प्रजापतेर् (अयन)- -नम् काश्रौ २४,५,१९; लाश्रौ १०, १३,१३.
प्रजापतेर्-गृर्द[e]- -र्दैन जैश्रौ ४ : ७.
प्रजापतेर्-द्वादशसंवत्सर[i]- -रम् आश्रौ १२, ५, १५; शांश्रौ १३,२८,५; काश्रौ २४, ५, १९; हिश्रौ १८, ४, १२[j]; -रेण आपश्रौ २३,११,८[j].
प्रजापतेर्-हृदय- -यम् द्राश्रौ २,१,२०[g];२८; गोपि १, १,९; -येन बौश्रौ १०, ४९ : १५; माश्रौ ६, २, ४, ९; वाश्रौ २, २, ३, १३; वैश्रौ १९,६ : ६१.
प्रजापतेर्हृदय-स्थान- -ने द्राश्रौ २, १, २४[h].
प्रजापतेस्-तनू[k]- -नूः आश्रौ ८, १३, १२[l]; -नूम् शांश्रौ १०, १९,२[१२].
प्रजापतेः-सहस्रसंवत्सर- -रम् शांश्रौ १३, २९,३२; निसू १०, १३ : १५; -रयोः आपश्रौ १९,१५,७; -रेण आपश्रौ २३, १४,१२; हिश्रौ १८,४,६६.
(प्रजापतेः)सहस्रसंवत्सर- -रम् शांश्रौ १३,२९, ३२.

a) परस्परं पाभे.। *b*) विप.। बस.। *c*) परस्परं पाभे.। *d*) प्रजाति° इति संस्कर्तुः टि.। *e*) प्रजातिसं° इति पाठः? यनि. शोधः (तु. संस्कर्तुः टि.)। *f*) =साम-विशेष-। *g*) सपा. °तिहृ°<>°तेर्हृ°<> °तेः साम इति पाभे.। *h*) सपा. °तिहृ°<>°तेर्हृ° इति पाभे.। *i*) पृ १३१८ २द्वादशसंवत्सर- इति नेष्टम्। *j*) सपा. °रम्<>°रेण इति पाभे.। *k*) =मन्त्र-विशेष- (तु. भाष्यम्)। *l*) पृ ११५६ सस्थ. तनूः इति नेष्टम्।

प्रजापतेः-सामन्- -म[a] आपश्रौ १७, १२, ११; हिश्रौ १२,३,१३.
प्रजा-परिपालन- -नम् विध ३,२.
प्रजा-पशु-काम- >°म-वैश्य-रथकृत्- -ताम् काश्रौ ४,७,७.
प्रजा-पश्व(शु-अ)न्न-काम- -मस्य अशां १७,२.
प्रजा-पश्व(शु-अ)न्न-यशस्-काम- -मस्य काश्रौ ४,४,१.
प्रजा-पालन- -नम् वाध २, १७; सुध ७.
प्रजापालन-दुष्टनिग्रह-युद्ध- -द्धानि वैध १, १, ७.
प्रजा-भाग्यो(ग्य-उ)द्भव[b]- -वम् अप ५२,१४,४.
?प्रजाभाङ्गिरतः[c] कौसू २२,९.
प्रजा(जा-अ)भिराम[d]- -मः शंध २४४.
प्रजा-मेधा- -धयोः पा ५,४, १२२.
प्रजा(जा-अ)र्थ->°र्थिन्- -र्थिनाम् बृदे ३,३२; -र्थी अप ७०[2],१३,२.
प्रजार्थि-होम- -मम् आग्निगृ २,५,६:१.
प्रजा-वत्- -†वत् शांश्रौ २,२२, ४; आपश्रौ ६,२३,१; बौगृ ४, ३,४; -वतः बृदे ८,८०; -वता या ११,२४†; -†वन्तः शांश्रौ १५,२७,१; आपश्रौ; -वन्तम् आग्निगृ २, १, ५:९†; -वान् काश्रौ २३,३,१†; आपश्रौ; ऋअ २,१०,१८३[e].
प्रजावती-(>प्राजावत-पा.)पाग ४, ४, ४८; -०ति †कौसू २४, १३; ३९, ९××; -†ती आपश्रौ ३, १०, ९; ४, १३, ३; भाश्रौ; कौसू ५, २?[f]; -†तीः आपश्रौ १, ११, १०[g]; बौश्रौ १, १:१२; ३:१६[g]; भाश्रौ १, १२, ३[g]; हिश्रौ १, ३, १९[g]; कौसू; या ५, २; -†तीम् आपमं १,७,९; बौगृ १,५,५; ४,२,१२.
प्रजावज्-जीवपुत्र[h]- -त्राभ्याम् आगृ १, १३, ६;-त्रौ बृदे ५,९२.
प्रजा-वृद्धि- -द्धिः आपध २, ७,४; हिध २,२,२५.
प्रजा-व्यृद्ध-पशु-व्यृद्ध- -द्धस्य आपश्रौ ५,२८,१२.
प्रजा-संस्कार- -राः बौगृ २, ६, १८.
†प्रजा-सनि[i]- -नि शांश्रौ ४, १३, १; आपश्रौ ६, ११, ५; बौश्रौ; -निः वैताश्रौ १९,१६.
प्रजा-संतान- -नम् बौध २, ९, १०.
?प्रजासहत्वकर्मन्- -र्मभ्यः आग्निगृ १, ६, १:१५; वैगृ ३, २:८.
प्रजा-सुख- -खे विध ३, ९८.
प्रजा-स्थान- -नम् निसू ४,६:७.
प्रजा-स्थापन[j]- -नम् अप १, ४३,१०.
प्रजा-हित- -तम् अप ५२,११, २; -तेषु बौश्रौ १८, २०:८.
प्रजे(जा-ई)श- -शाय वैगृ २, १:९†.
प्रजो(जा-उ)त्पत्त्या(त्ति-आ)नुपूर्व्य[k]- -र्व्येण हिगृ२, १७,७.
प्र-जात,ता- -†तम् अप ११,१,६; १३, १, ७; अशां १९, १; अअ १९,२६; -ता वाधूश्रौ ४, ३६: ३; वाध १७, ७८[4]; बौध २,१, ३८; -†ताः आपश्रौ १,२४,५; बौश्रौ १, ९:९; भाश्रौ; -०ताः माश्रौ २, ३,३,७[l]; -तान् बौश्रौ १७,२८:१७; हिश्रौ १२,८,७; आपशु १२, ६; -तानाम् अप ६८,२,४१; -तायाः काश्रौ २५, ११, १८; -तायाम् शांश्रौ ३,४, १४; -ते काश्रौ २०, ३, २०; आपश्रौ; -तौ वाधूश्रौ ४,१९:४३
प्र-जाति- -तिः चाअ ६:२[m]; -तिभिः वैश्रौ ८, ५:१६[m]; -तिम् आपश्रौ १०,२,११××†; २३,१४,११[n]; माश्रौ १,४, २, ६; आपध; -तीः बौश्रौ ४, ५: १०[m]; -तेः क्षुसू ३, १४:१५; -†त्यै शांश्रौ १६, २२, २६; आपश्रौ ५,६,१; बौश्रौ.
प्रजाति-काम- -मः आश्रौ ९, ७, २९; शांश्रौ ४, १३, १××;

a) पाभे. पृ १६६१ f द्र.। *b*) विप.। षस. > बस.। *c*) °भाः अ° > संधिन्यायेन यनि. इति संस्कर्तुः टि.। *d*) विप.। उस.। *e*) =ऋषि-विशेष-। *f*) तु. वैप १, २१३३ g!. *g*) पाभे. वैप २, ३खं. प्रजावतीः तैब्रा ३,७,४,१४ टि. द्र.। *h*) द्वस.। *i*) वैप १ द्र.। *j*) उप. करणे कृत्। *k*) जनन-क्रम- इति भाष्यम्, Old. च। प्रज्ञो° इति Böht (ZDMG ५२,८७) शोधः?। *l*) पाभे. वैप १, ९९८ p द्र.। *m*) =मन्त्र-विशेष-। *n*) पाभे. पृ १६५८ m द्र.।

बौश्रौ; -मस्य आश्रौ १०,१,२; काश्रौ २२,१०,१३; २३,१,१४; -माः आश्रौ ११, ३, ६; शांश्रौ १४, ६०,१; -मानाम् शांश्रौ १३,२८,४; काश्रौ २४,३, २४.

प्रजातिकाम-यज्ञ- -ज्ञः निसू ७,७ : २३; ८,३ : १; -ज्ञे निसू ७,७ : २५.

प्रजातिकामयज्ञ-त्व- -त्वात् निसू ७,७:२७;८,३ : २.

†प्र-जाव(र>)री- -रीः[a] माश्रौ १, १,३,७; मागृ १,१२,३.

प्र-जनन- प्रभृ. प्र√जन् द्र.

प्र√जम् > प्र-जमित- > °ता(त-अ)ग्नि[b]- -ग्नयः या ७, २४.

प्र√जम्भ्, प्रजम्भयेत् आपशु १९,९.

प्र-जा- प्रभृ. प्र√जन् द्र.

प्र-जागर- प्र√गृ (अवबोधने) द्र.

प्र-जाति- प्रभृ. प्र√जन् द्र.

प्रजानक[c]- -कः कागृ २०,२.

प्र√जि, प्र(जय) अप्र ६,१२६†[d].

प्राजैषम् शांश्रौ १८,२१,८†.

प्र-जय- -यम् शांश्रौ १८,२१,८†.

प्र√जि,जिन्व्, प्र···जिनोषि[e] आपमं २,१८,९; या ११,३७†.

प्रजिन्वसि या ११, ३७; प्रजिन्वन् आश्रौ ४, १३, ७†; प्र(जिन्वन्) ऋअ २, १, ७१†.

प्र-जिगांसत्- प्र√गम् द्र.

?प्रजिघाति सु २९,२.

प्र√जीव, प्रजीवतात् भाश्रौ १, १०, १०?[f].

प्र-जीवसे हिपि १८ : ५†.

प्र√जु, प्रजवेते, †प्र···जवेते या ९, २९; †प्र(जवेते) ऋअ २, ३, ३३; बृदे ४,१०५.

प्रजावयति या ९,१७.

प्र-जव[g]- -वः या ११, २०†; -वेषु या १,९; १३,१३.

प्र-जविन्- पा ३,२,१५६.

प्र√जृम्भ्, प्रजृम्भयेत् हिशु ६,२९.

प्र√ज्ञा[h], प्र(जानाति)अप्र १५, १२†; प्रजानन्ति बौश्रौ १४, ५ : ३१; वाधूश्रौ ४,६४[४]:७;९; प्रजानीम जैगृ २, १ : २४; प्रजानीयात् बौश्रौ १६, २७ : १७; प्रजानीयुः आपध २,१५,२१;हिध २,३,५५ प्रज्ञायते आग्निगृ ३,९,२ : १०; आपगृ ८, १; बौपि १, १० : १०××; प्रज्ञायन्ते वाधूश्रौ ४, ४५ : ३; प्रज्ञायेत आपश्रौ ९, ११,२२; हिपि २३ : १८.

प्रज्ञापयति या ११,२७.

प्रजिज्ञासीत बौश्रौ २४,६ : ५.

†प्र-जानत्- -नन् आश्रौ ३,१०,८; १२,२२; शांश्रौ; आपश्रौ ६,२६, ७[i]××; ९,२,६[i]; भाश्रौ ९, ३, ८[i]; हिश्रौ १५, १, ४५[i]; या ७, २७; ८, २०; ९, १५; -नन्तः आपश्रौ ७,१२,१०;१५,४; १६, २९,१; बौश्रौ.

†प्रजानती- -ती आपश्रौ १६, २९, १; बौश्रौ १६, २७ : १८; वैश्रौ; -तीः आपश्रौ ४, ४, ४; भाश्रौ ४,५,५; वाश्रौ.

प्र-ज्ञ- पाग ५, ४, ३८; -ज्ञाः कौशि ५९; अप ५५,५,३.

१प्राज्ञ- पा ५, ४, ३८; -ज्ञः कागृउ ४६ : १०; आग्निगृ २, ५,१ : १२; जैगृ २,९ : ६; अप १२, १, ८; शंध १९१; २३५; मैअ १; चव्यू ४ : २०; या १२, ३७[j]; -ज्ञम् अप ७०, १, १; -ज्ञाः अप ३०[२], २, ९; कौशि ३; नाशि १,४,१२.

प्राज्ञ-ता- -ताम् माशि १६, १०.

प्राज्ञ-सेवन- -नात् माशि १६,१४.

प्र-ज्ञा- पाग ५, २, ९७; १००; -ज्ञया आग्निगृ १, १, ४ : ३†; हिगृ १, ७, २†; जैगृ १,१२ : ४०†; या २, २५; ६, १३××; -ज्ञा आगृ ३, ९, १†; भागृ १, ११ : १†; मागृ; या ५, १४; १०,४१; -ज्ञाम् कौगृ २, ५,१; कप्र १, १०, ४; शंध; या २, २८; ७, २७; -ज्ञायाः निघ ३,९; -ज्ञायाम् भागृ १, ११ : ३?[k]; मागृ १, ७, ७; वागृ १०, ६; -ज्ञायै आगृ ३, ५, ४; जैगृ २,८ : ७; बौध ३,९,५.

२प्राज्ञ- पा ५,२,१०१.

प्रज्ञा-नामन्- -म या १०, ३४; -मानि या ३,१३.

प्रज्ञा-ल- पा ५,२,९७.

प्रज्ञा-वत्- पा ५, २, १००; -वान् वैश्रौ १२,१ : १.

प्रज्ञावत्-त्व- -त्वम् या १०, ३४.

प्रज्ञिल- पा ५,२,१००.

प्र-ज्ञात,ता- -तः शांश्रौ १८, २४

---

a) पाभे. पृ १६६२ g द्र. । *b*) विप. । बस. । *c*) =देवता-विशेष- । व्यु. ? । *d*) पाभे. वैप १, ६३१ k द्र. । *e*) वैप १,२१३४ b द्र. । *f*) °जीवि° इति पाठः? यनि. शोधः । *g*) वैप १,२१३४ f द्र. । *h*) पा ३, २,६ परामृष्टः द्र. । *i*) पाभे. वैप १, २१३४ m द्र. । *j*) =(सुषुप्तस्थान-) आत्मन्- (तु. मां ११) । *k*) प्रा° इति पाठः? यनि. शोधः (तु. मागृ.) ।

१६; बौश्रौ ३,१२ : १;१२××; –तम् आपश्रौ १, ६, ८; १४, ६××; बौश्रौ; –तया काश्रौ ६, ६,८; –ता शांश्रौ १८,२४,१७; १८; काश्रौ; –ताः काश्रौ २२, ११,२२; बौश्रौ ३,१ : ६; १०, १२ : ९; ११, १ : १२; –तान् आपश्रौ ११, ६, ३; १२, ८, ४; २०, १२, १०; भाश्रौ; –तानि बौश्रौ २,९ : ३२; भाश्रौ; –ताम् बौश्रौ १२,१४ : ७; हिश्रौ ५, १, १६; आग्निगृ; –ते आपश्रौ १,११,१०; बौश्रौ; –तौ बौश्रौ २,९ : ३३; हिश्रौ.

प्रज्ञात-तम- -मम् या २,१९.

प्रज्ञात-दक्षि(णा>)ण[a]- -णः आश्रौ १२,१५,१०.

प्रज्ञात-पृष्ठ[b]- -ष्ठः क्षुसू २, १० : १३.

प्रज्ञात-स्तोम[b]- -मम् बौश्रौ २६,१६ : १७.

प्रज्ञाता(त-अ)विनष्ठा(ष्ठ-अ)श्रि[c]- -श्रिः आपश्रौ ७,३,२.

प्रज्ञाता(त-अ)ग्र,ग्रा[b]- -ग्रम् शांश्रौ १७,१,१३; –ग्राः द्राश्रौ ५,२,३; लाश्रौ २, ६, १; निसू १,११ : ६.

प्रज्ञाते(त-इ)ष्ट्य(ष्टि-अ)ति-पत्ति- -त्तौ काश्रौ २५,४,२१.

?प्रज्ञातो(त-उ)त्पन्न- -न्नः हिध २,५,४९[d].

प्र-ज्ञाति- -त्यै हिश्रौ ६,१,६.

प्र-ज्ञातृ- -ता क्षुसू ३, १४ : १२; या १०,२७.

प्र-ज्ञान- -नम् बौगृ १,४, ३†; भागृ १, १७ : १२†; अप १, ४६, १; या ४, १०; १२, ७; कौशि १०; –नानि या ८, २०; ९,१५;३३××; –नाय अअ ११, ३†.

प्रज्ञान-वत् या ५,१५.

प्रज्ञान-वत्- -वन्तः या ४,१०.

?प्रज्ञानाम्[e] अअ १३, २†.

प्र-ज्ञायमान- -ने गोगृ ४,४,२५.

प्र-ज्ञु- पा ५,४,१२९.

प्र-ज्य[f]- -ज्यम् बौश्रौ २४,१२ : १; २५,४ : १.

प्र-ज्योति[b]- -तिषु बौश्रौ १८, ४० : २०.

प्र √ज्वल्, प्रज्वलति अप २१,७,४; प्रज्वलन्ति अप ७०[3],८,३; ७१, १४, ५; १५, ३; ७२, ४, ४; प्रज्वलेत् अप ७०[2],१९,७. प्रज्वलयन्ति आपश्रौ १०, २९, ८; भाश्रौ १०, २०, ५; वैश्रौ १२, २१ : ३; हिश्रौ ७,३,२०; प्रज्वालयत आगृ ४, ४ : १; प्रज्वालयेत् कागृ ४५, ४; अप १८,३,८; प्रज्वलयेयुः लाश्रौ ९, ७,१५.

प्र-ज्वलत्- -लन् अप २१,७,२.

प्रज्वलन्ती- -न्ती अप ६९,१,४.

प्र-ज्वलन- -ने अप ७१,२,१.

प्र-ज्वलयत्- -यन्तः मागृ २, १, २?[g].

प्र-ज्वलयित्वा हिश्रौ ९, ४, २७; आग्निगृ १,६,३ : ५०××; हिगृ.

प्र-ज्वलित- -तः भागृ २, ५ : ४; –तम् आग्निगृ ३,६,१ : ३; बौपि १,८ : ३; जैगृ १,२० : ७; –ते आपश्रौ १५,८, ११†; बौश्रौ ९, ७ : २४; भाश्रौ; –तैः अप ४, ५,६.

प्रज्वलिता(त-अ)ग्नि[b]- -ग्नयः या ७,२४.

प्र-ज्वल्य आश्रौ २,२,१[2];५, १.

प्र-ज्वाल्य बौश्रौ २७,७ : ३; माश्रौ.

प्र-ज्वाल्यमान- > °न-वपुस्- -पुः अप २४, ६, ४.

?प्रञ्चि सुध ८.

†प्र √ण(<न)क्ष्, प्र···नक्षन्त आश्रौ ८, ११, १; प्र(नक्षन्त) शांश्रौ १०, १०,४; ऋअ २,७, ४२.

प्र √ण(<न)म्, प्रणमामि सु १, २; प्रणमेत् वैश्रौ १,१ : ११; वैगृ ३, १३ : ११××.

प्रणामयेत् आश्रौ ५,६,१; ११.

प्र-णत- -तः आग्निगृ २, ६, १ : ४; वाध ३, ३०; शंध ३७; ९५; १०३; बौध १, ५, १५; –ताय अप १९[2], ५,८.

प्र-णति- -तौ विध २३,६१.

प्र-णम्य वैश्रौ २,१० : १७; आग्निगृ.

प्र-णाम- -मः वैगृ ३, २२ : ६; –मम् बौगृ ३, १२, १४; वैगृ;

प्रणाम-वत्- -वान् सु ३१, ६.

प्र-णय- प्रभृ. प्र √णी द्र.

प्र-णव- प्रभृ. प्र √णु द्र.

†?प्र-णवत्- -वन्तम् वैगृ ३, १७ : १२; ४,१४ : ८.

प्र √ण(<न)श् (व्याप्तौ), †प्रणक् आपश्रौ ६,१७,१२; हिश्रौ ६,६, १६; प्र···आनट् या ११, २५†.

प्र √ण(<न)श् (अदर्शने), प्रणश्यति विध ५७, ७; प्रणश्यन्ति अप ६८, २, ५२; प्र···नश्यसि या ९, ३०†; प्रणश्यतु अप ४०,५;

---

a) बस. उप. = २दक्षिणा- । *b*) बस. । *c*) बस. > कस. । *d*) सपा. आपध २,१७,२१ शूद्रोत्पन्नः इति पाभे. । *e*) वैप १ द्र. । *f*) बस. उप. = ज्या । *g*) °लन्तः इति पाठः? यनि. शोधः [तु. Knauer] ।

४; प्रणश्येत अप ३७, ४, १; प्र···नश्येत् वाधूश्रौ २,२०: १. प्रणाशयेत् बौश्रौ २८,११ : १६; बौध १,१,१५.

प्र-णाश- -शम् अप ८, १, ७; –शे बौश्रौ २८,११ : ६.

प्र-नष्ट,ष्टा- –ष्टम् गौध १०, ३५; –ष्टा वाध १, ३८.

प्रनष्ट-स्वामिक- -कम् बौध १, १०,१६.

प्रनष्टे(ष्ट–इ)न्दु-दिवाकर- -रौ अप ६४,७,२.

प्र √णि(<नि)ज्, प्राणिजन् आपश्रौ ६,२०,२[a].

प्र-णि(<नि) √धा> प्रणि-धि[b]- -धिम् वैगृ १,२० : ११; ४,१ : १७; –धी वैगृ १,११ : ७; १३; २० : १६.

प्रणि-हित–> °ता (त-आ)त्मन्[c]- -त्मा आपध १,४,२९; हिध १, १,१४८.

प्र-णि(<नि) √पत्>प्रणि-पत्य गौपि २,६,१४; अप.

प्र-णि(<नि) √हन्, प्रणिहन्यते शुप्रा १,१२४; ४,१४०.

प्र √णी (<नी), प्रणयते काठश्रौ २९; बौश्रौ १७,३३ : ५; प्रणयति काश्रौ ५,४,२;६,२, ३; ८, ३, १९; १८, ३, १५; आपश्रौ; प्रणयतः आपश्रौ ८,५, २२; ६, ७; बौश्रौ; प्र(नयन्ते)साअ १, ४७८†; प्रणयन्ति आश्रौ ३,१२, २४; शांश्रौ ३,१४,८;५,१४,१; जैश्रौ; प्रणयामि बौश्रौ २४,२५: ९†; भाश्रौ; शांगृ १,७,९[d]; प्र··· नयन्त ऋप्रा ८, ४†; †प्रणयतु आपश्रौ १,१६,८; भाश्रौ १,१८, ६; माश्रौ; †प्रणयन्तु आपश्रौ १२, २२,१[2]; बौश्रौ ७,१३:२०;२२; माश्रौ; †प्रणय आश्रौ १, १२, १२; काश्रौ २,२,८[2]; आपश्रौ; प्र···नय आपमं २, ११, २८†; प्रणयत आश्रौ ४, ८, २३†; †प्र(नयत) आश्रौ ३, ७, ५; शांश्रौ; प्रणयानि आपश्रौ १, १६, ८†; प्रणयेत् आश्रौ २, २, ३; ६; ६, २××; आपश्रौ; प्रणयेयुः हिश्रौ १५, ६,८; क्षुसू १,१० : १८. प्रणिनाय बौश्रौ ४, १ : २७†; †प्रणेष्यामि[e] आश्रौ १,१२,१२; काश्रौ २, ३,२; आपश्रौ; प्रणेषि बौश्रौ ३, ३० : २०†; प्रणीयात् वाधूश्रौ २,१० : १२. प्रणीयते आश्रौ १, १२, २६; शांश्रौ ३, १५, २१; वैश्रौ १०, ६ : ७; हिश्रौ ४, २, २२; या ७,१४.

प्र(निनीषति) साअ १, ५८†.

प्र-णय[1]- पाग ५, २, १३१; –यः या २,१४.

प्रणयिन्- पा ५,२,१३१.

प्र-णयत्- -यन् आपश्रौ ८, १, ६; †बौश्रौ २, १० : ८; २४,२५ : ९; भाश्रौ; –यन्तः साअ १, ७४ब्रू†; †प्र(णयन्तः) साअ १, ७४; उनिसू ४ : ११.

प्र-णयन- -नम् काश्रौ ५, ४, ४; आपश्रौ ८, १,८; ९,७, २; मीसू ७, ३, १९; २३; –नात् आश्रौ ४,२,१२; आपश्रौ १५,१६,७; बौश्रौ; –नाय वैताश्रौ १५,१४; –ने आश्रौ १,१२,२९.

प्रणयनी- -नी वाश्रौ १, ६, २,६.

प्रणयन-वर्जम् आपश्रौ ९,१,१४; भाश्रौ ९, १, १४; हिश्रौ १५, १,१४.

प्रणयना(न-आ)दि- -दि काठश्रौ ६३.

प्रणयनीय- -यः बौश्रौ ३, १ : १४; –यम् काश्रौ १, ३, २१; आपश्रौ.

प्रणयनीया(य-आ)धान- -नम् काश्रौ ८,६,२८.

प्रणयनीयाधाना(न-आ)दि- -दि काश्रौ १९,२,४.

प्र-णयितुम् आपश्रौ १९, ४, १; हिश्रौ १३,८,३५.

प्र-णयित्वा जैगृ १, ११ : २; २, १ : ११.

प्र-णाय्य- पा ३, १, १२८; –य्यः वाधूश्रौ ३,१८ : १६;९२ : ७[f g]; –य्यम् वाधूश्रौ ३, ९२ : ९; –य्यान् वाधूश्रौ ३,९२ : ४.

†प्र-णी[h]- -णीः आश्रौ १, ३, ६; शांश्रौ १,४,२०; ७,९,३; –ण्यः ऋप्रा ५,५४.

प्र-णीत,ता[i]- -तः भाश्रौ ४, ३, १; कौसू ८९, १५; अप्राय; –तम् मागृ २, १३, ६†; –तस्य बौश्रौ २, ७ : २०; वाश्रौ १, २, ३, २; –ता माश्रौ १, ८, ६, २६; वैश्रौ ११, ८ : ४; –ताः आश्रौ १, १, ४; शांश्रौ १,४,१;

---

a) पाभे. वैप १, २१३५ j द्र.। *b*) = प्रणीता-पात्र-। गस.। *c*) बस.। *d*) सपा. कौगृ १, ३,२ दधामि इति पाभे.। *e*) पाभे. वैप २, ३खं. प्रणेष्यामः शांश्रा ६, १२ टि. द्र.। *f*) उप. भावे कर्तरि च कृत्.। *g*) मा° इति पाठः? यनि. शोधः। *h*) वैप १ द्र.। *i*) नाप. स्त्री. = २अप्-, ⌊उपचारात्⌋ पात्र-।

१८,२४,२७; काश्रौ; –तानाम् बौश्रौ २७,१ : १२^{2}; माश्रौ १, २, ३, १३; वाश्रौ; –ताभिः आपश्रौ १, २४, ३; बौश्रौ २६, ३२ : ९; भाश्रौ १, २५, २; –ताभ्यः आपश्रौ १, २४, ५; बौश्रौ; –ताम् बौश्रौ २४, ३७ : ४; वागृ १, १२; वैगृ ४,१ :५; –तायाम् वैगृ १, १३ : १०; २० : ४; ६; –तासु शांश्रौ ४, ७, १८; काश्रौ १, ७, १८; आपश्रौ; –ते आश्रौ ३, १२, २७; आपश्रौ.

प्रणीता-काल– -ले शांश्रौ ४, ७,१.

प्रणीता-चरु– -रुः शांगृ ५,८,३.

प्रणीता(त-आ)दि– -दि काश्रौ ५,४,१९; ८,२,१६; मीसू ९, १,२३.

प्रणीता(ता-अ)नुहरण– -णम् काश्रौ ५,८,२३.

प्रणीता(ता-अ)प्– -तादूभ्यः बौगृ १,४,३८.

प्रणीता-पत्नीसंनहना (न-अ)ग्नि-मन्थना(न-आ)श्रुत-प्रत्याश्रुत-प्रैष-यजमानवाचन-होतृषदन-वरण-प्राशित्रा(त्र-अ)ङ्गुलिपर्वा-ञ्जना(ग-अ)वान्तरेडाभागा-(ग-अ)पराग्न्य(ग्नि-अ) वभृथ- -थान् काश्रौ ५,४,३१.

प्रणीता-पात्र– -त्रम् वाश्रौ १, २,४,४; बौगृ ४,१,५.

प्रणीता-प्रणयन[a]– -नम् शांश्रौ ४,१४,२४; काश्रौ २५, ७,२८; आपश्रौ; –ने आग्निगृ १,६,१ : २७.

प्रणीता-प्रोक्षण-वत् आग्निगृ २, ३,४ : ८.

प्रणीता(ता-अ)र्थ– -र्थे मीसू ९, ४,३३.

प्रणीता-लोक– -केन बौश्रौ २४, १५ : १०.

प्रणीता-वत् भागृ १, ३ : ४; ३, १६ : ४.

प्रणीतावद्-उपचार[b]– -रम् भागृ ३,१६ : ४.

प्रणीता-वर्जम् वैश्रौ १६,२३ : ४.

प्रणीता-शेष– -षम् वाश्रौ १, १, ४, २१.

प्रणीतो(ता-उ)त्कर– -रौ काश्रौ १,३,४२.

प्रणीतो(ता-उ)दकुम्भ– -म्भम् वागृ १४,६.

प्र-णीति– -तीः कौसू ५६, १६; –तौ वाश्रौ ३,२,४,१०?.

?प्रणीनात् बौश्रौ २३,२ : १८.

प्र-णीय आश्रौ १, १,२××; शांश्रौ.

प्र-णीय– पा ३,१,१२३.

प्र-णीयमान,ना– -नम् द्राश्रौ १४,४, १२; लाश्रौ ४,९,१७;५,८,१२; –नयोः वैताश्रौ ८, १७; –नस्य माश्रौ १,५,४,८; ६, २, ५, ७; –नाः आपश्रौ ४, ४, ४; भाश्रौ ४,५,५; वाश्रौ; –नानाम् आपश्रौ १४,८,६; बौश्रौ २७, १ : १२; हिश्रौ १०, ८, २३; –नाभ्यः शांश्रौ ९,२४, ९[c]; –†नाभ्याम् शांश्रौ ५, १४,७; आपश्रौ ११, १७, २^{2}; बौश्रौ; –†नाय काश्रौ ८, ७, ४; आपश्रौ ७, ६, ४^{2}; बौश्रौ; –नासु आपश्रौ १, १६, ७; ४, २, ७; बौश्रौ; –ने शांश्रौ ४, ६, १३; ८, १५, १०; काश्रौ; –†नेभ्यः आपश्रौ १६, २१,३^{2c}; बौश्रौ १०,२७ : ११; माश्रौ ६, १,६,१४[c]; वाश्रौ २, १,६,५[c]; वैश्रौ १८, १६ : २८[c]; हिश्रौ ११, ७,४^{2c}; –नौ माश्रौ ५, २,१६,८; द्राश्रौ.

प्र-णेत(व्य>)व्या– -व्या या५,२३.

प्र-णेतृ– -†०तः आश्रौ ३, ७, ११; आपमं १,१४,३; शुप्रा १,१६८; –तारः शंध ३; –†तारम् वैताश्रौ ४२,८; अअ २०, ४६; –तारौ या ६, १३; –तृभिः बौश्रौ १८, ४० : २२; –तॄन् बौश्रौ १८, ४० :१७.

प्र-णेष्यत्– -ष्यत्सु आश्रौ ४, १०, १; बौश्रौ २०, १ : ४१; द्राश्रौ १५, १, १; लाश्रौ ५, ९, १; –ष्यन् बौश्रौ ११, २ : ११; १२××; माश्रौ; –ष्यन्तम् वाश्रौ १,१,५,१०; –ष्यन्तौ हिश्रौ ५, २,१०.

प्र√णी(<नी)क्ष्(व्यधने)>प्र-णीक्ष्य आपश्रौ ७,२२,९; ९,१९,४.

प्र√णु,णू (<नु,नू), †प्र(नवन्त) ऋअ २,१०,१७६; बृदे ८,७४. प्रणौति शांश्रौ ७, १०, ७; २५, ६××; आपश्रौ; प्रणुवन्ति आश्रौ ६, ४,३;४; प्रणुयात् आश्रौ २, १४, २९; ६, ३, ६××; शांश्रौ ६,३,१०; १८,१४,५; प्रणौयात् बौश्रौ १४, १० : २३.

†प्रणोनुमः आश्रौ७,८,१; शांश्रौ १२,११,२०; ऋप्रा ५, ५७.

प्रणोनुवुः ऋप्रा ५, ५७.

प्र-णव[d]– -वः आश्रौ २, १५, १४;

---

